ISSN- 2583-5629

# दीपशिखा

## रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
## संस्कृत-दर्शन-विभागस्य ई-पत्रिका



एकादशः अङ्कः
(जुलाई, २०२६)

ISSN– 2583-5629

# दीपशिखा

(रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य
संस्कृतदर्शनविभागस्य षाण्मासिकी ई-पत्रिका)

एकादशः अङ्कः
(२८ आगस्ट, २०२६)

उपदेष्टा

स्वामी आत्मप्रियानन्दः

मुख्यसम्पादकः

डॉ. राकेशदाशः

संस्कृतदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्
बेलुडमठः, हावडा, पश्चिमवङ्गः ७११२०२

सम्पादकमण्डली

डॉ. गोपीकृष्णन् रघुः

डॉ. नीरजकुमारभार्गवः

डॉ. शन्तनुः अयाचितः

डॉ. सुखदेवभट्टः

(डॉ.) ब्रह्मचारी शुभदीपः (लोकेशचैतन्यः)

सम्पादनसहायकः

प्रलयनन्दी

# सूची


| क्रमः | प्रबन्धः (पठितुं शीर्षकं नुदतु) | लेखकः | पुटसङ्ख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | सम्पादकाः | १ |
| २. | व्यासदेवस्य सामान्यचरितम् | सागरचक्रवर्ती | ४ |
| ३. | मोक्षदायिन्यः पुर्यः | आकाशशीटः | ७ |
| ४. | प्राचीनभारतीयसंस्कृतौ गुरुशिष्यपरम्परायाञ्च सान्दीपनिमहर्षेः माहात्म्यम् | सौम्यदीपसाधुखाँः | १२ |
| ५. | महर्षिः वसिष्ठः | भगीरथगराइः | १६ |
| ६. | गुरुदेवः दक्षिणामूर्तिः सच्चिदानन्दविग्रहः | संजीवगराइः | २० |
| ७. | श्रीगुरुस्तुतिः | सुरजित्-प्रामाणिकः | २४ |
| ८. | गुरुप्रशंसापञ्चकम् | ऋतेश-साँतराः | २६ |
| ९. | अद्वैतवेदान्ते गुरुपरम्परा | अङ्कुरच्याटार्जी | २७ |

| | | | |
|---|---|---|---|
| १०. | पाणिनीयव्याकरणे गुरुपरम्परा | सायनदासः | ३३ |
| ११. | श्रीमद्विवेकानन्दस्वामिनां चरितम्<br>१. दत्त-परिवारः | स्वामिजपसिद्धानन्दः | ३६ |
| १२. | स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम्<br>(अंशविशेषस्य अनुवादः) | अनुवादकः– ब्रह्मचारी अच्युतचैतन्यः | ४३ |
| १३. | स्वामिसारदानन्दकृतः श्रीश्रीरामकृष्णलीलाप्रसङ्गः<br>(अंशविशेषस्य अनुवादः) | डॉ. राकेशदाशः,<br>शान्तनुनायेकः<br>(अनुवादकौ) | ४७ |

# सञ्चारिणी दीपशिखा

दीपशिखा प्रतिभार्थान् प्रकाशयन्ती जाज्वल्यमाना वर्तते। पत्रिकायाः अयम् एकादशः अङ्कः गुरुभ्य उत्सृष्टः। असहायस्य सहायभूतः, अप्राणस्य प्राणभूतः गुरुरेव किल घने अज्ञानान्धकारे अन्धस्य यष्टिः। दुस्तरे संसारसागरे स खलु केवलः दीपस्तम्भः, मानवाः संसारसागरतरणे अग्रे सरन्ति। तम् एव गुरुं विषयीकृत्य अस्मिन् अङ्के प्रबन्धाः पद्यानि च लिखितानि।

तत्र प्रथमतः संस्कृतदर्शनविभागस्य चतुर्थवर्षीयच्छात्रः सागरचक्रवर्ती महर्षेः वेदव्यासस्य सामान्यं चरितं वर्णितवान्। अत्र व्यासस्यः प्रादुर्भावः, नाम्नः विचारः, कृतयः, अवतारत्वविचारः इत्यादयो विविधा विषयाः सनैपुण्यं प्रतिपादिताः इति सागराय अभिनन्दनानि।

मोक्षदायिनीः सप्तापि पुरीः सप्रसङ्गं तत्त्वतः च प्रतिपाद्य प्रशस्तिम् अर्जयति अस्मद्विभागस्य चतुर्थवर्षीयच्छात्रः आकाशशिटः। आकाशेन स्वप्रबन्धे प्रत्येकं पुर्याः सविस्तृतं वर्णनम् उपस्थापितम्, अनेन नूनं पाठकाः समृद्धाः भवेयुः इति अस्मन्मतिः।

विभागस्य तृतीयवर्षीयच्छात्रः सौम्यदीपसाधुखाँ महर्षेः सान्दीपनेः सविस्तृतम् आलोचनं प्रस्तुतवान्। अस्मिन् प्रबन्धे तेन मुख्यतः प्राचीनभारतीयसंस्कृतिः, गुरुशिष्यपरम्परा तथा तत्र सान्दीपनिमहर्षेः माहात्म्यम् इत्येते विषयाः सयत्नं निरूपिताः सन्ति।

द्वितीयवर्षीयच्छात्रेण सुमतिना भगीरथेन महर्षेः वसिष्ठस्य वर्णनं कृतम्। अत्र तेन वसिष्ठस्य माहात्म्यं, सनातनसंस्कृतौ तस्य अवदानम् इत्येवं केषुचित्

विषयेषु प्रकाशो नीतः।

अस्मद्विभागस्य शोधच्छात्रः श्रीमान् सञ्जीवगराइः स्वप्रबन्धे गुरोः दक्षिणामूर्तेः विषये लघुशोधम् एव प्रस्तुतवान्। अत्र तेन दक्षिणामूर्तेः स्वरूपं, तन्माहात्म्यम् इत्यादयो विषयाः सयत्नं निरूपिताः इति स प्रशस्तिम् अर्जयति।

तदनन्तरं विभागस्य द्वितीयवर्षे अधीयानाभ्यां सुरजित्-प्रामाणिकः तथा ऋतेशसाँतरा इति द्वाभ्यां कविभ्यां गुरोः प्रशस्तिं विषयीकृत्य पद्यानि रचितानि। स्वपद्येषु ताभ्यां गुरोः परमकारुणिकत्वम्, तथा संसारसागरतरणे तस्य आवश्यकता इत्यादयो विषयाः सुन्दरशैल्या प्रस्तुताः इति तौ प्रशस्यौ भवतः।

चतुर्थवर्षीयच्छात्रः अङ्कुरच्याटार्जी अद्वैतवेदान्ते गुरुपरम्परा इति विषयम् आश्रित्य विस्तृतं रम्यं च प्रबन्धं लिखितवान्। अत्र अङ्कुरेण यथा गुरुपरम्परायाः माहात्म्यं निरूपितं तथैव परम्परायाः इतिहासः अपि सुन्दरशैल्या उपस्थापितः। ततश्च विभागीयेन शोधच्छात्रेण सायनदासेन पाणिनीयव्याकरणे गुरुपरम्परायाः विषये सारगर्भितः प्रबन्धः लिखितः। अत्र सायनेन पाणिनीयव्याकरणस्य आचार्यपरम्परा विस्तारेण वर्णिता। आभ्याम् उभाभ्यामपि अभिनन्दनानि।

संस्कृतदर्शनविभागस्य संयुक्ताध्यापकेन स्वामिजपसिद्धानन्दमहाराजेन प्राञ्जलभाषया श्रीमद्विवेकानन्दस्वामिनां चरितं वर्णितम्। अस्मिन् प्रबन्धे महाराजेन मुख्यतः दत्तपरिवारस्य वर्णनम् उपस्थापितम्। अनेन नूनं पाठकाः समृद्धाः भवेयुः इति महाराजाय धन्यवादाः।

इतः परं पत्रिकायाम् अनुवादद्वयं योजितम्। तत्र प्रथमतः ब्रह्मचारिणा अच्युतचैतन्येन स्वामिगम्भीरानन्दविरचिते ग्रन्थे स्थितस्य स्वामिब्रह्मानन्दचरितस्य अंशविशेषस्य अनुवादः कृतः। एतेन

संस्कृतपाठकसमाजे श्रीरामकृष्णदेवस्य मानसपुत्रत्वेन परिचितस्य ब्रह्मानन्दमहाराजस्य जीवनचरितं नूनं प्रचारितं भवेद् इति ब्रह्मचारिमहाराजाय कार्तज्ञ्यं निवेद्यते।

ततः पूर्वाङ्केषु इव, अस्मिन्नपि अङ्के स्वामिसारदानन्दकृतस्य श्रीरामकृष्णलीलाप्रसङ्गग्रन्थस्य अंशविशेषस्य संस्कृतेन अनुवादः प्रस्तुतः। ईदृशस्य तत्त्वसमृद्धस्य ग्रन्थस्य प्राञ्जलभाषया अनुवादः कृतः इत्येतदर्थं धन्यवादार्हो भवति अनुवादकः विभागस्य शोधच्छात्रः शान्तनुनायेकः।

अवसरेऽस्मिन् विश्वविद्यालयस्य प्रतिकुलाधिपतीन् आत्मप्रियानन्दस्वामिनः प्रणमामि। अन्येभ्यश्च साह्यम् आचरितवद्भ्यः नामानि अनुच्चार्यैव कार्तज्ञ्यं विज्ञाप्यते।

डॉ. राकेशदाशः
दीपशिखापत्रिकायाः मुख्यसम्पादकः
तथा
विभागाध्यक्षः
संस्कृतदर्शनविभागस्य
रामकृष्ण-मिशन्-शैक्षणिक-शोध-संस्थानस्य
बेलुडमठस्य

# व्यासदेवस्य सामान्यचरितम्

सागरचक्रवर्ती*

संस्कृतसाहित्यगगने कृष्णद्वैपायनो महर्षिः व्यासदेवः साक्षात् ज्ञानभास्कर इव समवभासते। स न केवलं कोऽपि ऐतिहासिकः काव्यकर्ता, अपि तु भारतीयसंस्कृतेः मूलाधारः, साक्षात् विष्णुरूपः इति समाद्रियते। तदुक्तं सनातनपरम्परायाम्—

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः॥

## प्रादुर्भावः

द्वापरयुगस्य सन्धिकाले सत्यवत्याः पराशरमहर्षेः च तपोबलेन भगवतः विष्णोः कलावताररूपेण व्यासदेवस्य प्रादुर्भावः सञ्जातः। यमुनानद्याः कस्मिंश्चिद् द्वीपे जन्माभिव्यक्तत्वाद् अस्य महर्षेः संज्ञा द्वैपायनः इति अभवत्। श्रूयते च अस्य गात्रस्य श्यामवर्णत्वाद् अयं कृष्णः इति, बदरिकाश्रमे दीर्घकालं यावत् कठोरतपश्चर्याचरणाद् बादरायणः इति च विश्रुतो जातः। कलियुगीयानां मन्दभाग्यानां मानवानां ह्रासोन्मुखीं बुद्धिं समीक्ष्य लोकानुग्रहकामनया तेन एक एव विस्तृतः वेदराशिः ऋग्-यजुः-साम-अथर्वभेदेन चतुर्धा विभक्तः, अत एव स जगति वेदव्यासः इति नाम्ना शाश्वतीं ख्यातिं लेभे।

व्यासदेवस्य सारस्वतं साम्राज्यं निखिलब्रह्माण्डे व्याप्तमस्ति। तेन प्रणीताः ग्रन्थाः न केवलं साहित्यिकदृष्ट्या श्लाघनीयाः, अपि तु आध्यात्मिक-दार्शनिक-नैतिकदृष्ट्यापि मानवसभ्यतायाः परमोत्कृष्टाः निधयः सन्तिः।

* चतुर्थवर्षीयच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य, बेलुडमठस्य।

## महाभारतम्

एष ग्रन्थः लक्षश्लोकात्मकः सन् शतसाहस्री संहिता इति निगद्यते। अयं न केवलं कश्चिद् इतिहासः, अपितु धर्म-अर्थ-काम-मोक्षाणां ज्ञानकोशः वर्तते, येन एषः पञ्चमवेदः इति प्रथितः। अस्य ग्रन्थस्य विषये स्वयं व्यासः उद्घोषयति— "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्"।

## श्रीमद्भगवद्गीता

महाभारतस्य भीष्मपर्वणः उपनिषद्भूता एषा गीता विश्ववाङ्मयस्य मुकुटमणिः वर्तते । अत्र भगवता श्रीकृष्णेन व्यासमाध्यमेन अर्जुनं प्रति यः निष्कामकर्मयोगस्य, ज्ञानयोगस्य, भक्तियोगस्य च समन्वयः उपदिष्टः, सः अद्यापि दिग्भ्रान्तं मानवं प्रतिपदं मार्गं दर्शयति।

## महापुराणानि

जगति सदाचारस्य, भक्तेः, सदाशयतायाः च प्रसारार्थं व्यासेन अष्टादश महापुराणानि विरचितानि। तेषु परमहंससंहिता इति नाम्ना प्रसिद्धं श्रीमद्भागवतपुराणं रसशास्त्रस्य, वेदान्तस्य च परा काष्ठा मन्यते।

## ब्रह्मसूत्रम्

उपनिषदां परस्परविरुद्धावभासानां वाक्यानां समन्वयमुपस्थाप्य तेन शारीरकसूत्रं (ब्रह्मसूत्रम्) रचितम्, यद् उत्तरमीमांसादर्शनस्य प्रवर्तकग्रन्थः वर्तते। व्यासेन पुराणानि लिखितानि। तेषु पुराणेषु कर्तव्याकर्तव्ययोः ज्ञानविषये भक्तिसाधनादिनानाविषये च अत्यन्तं सागरतुल्यविषयाः उक्ताः, तेष्वपि सकलपुराणानां सारभूतं वचनद्वयं व्यासेन उपदिष्टाः—

अष्टादश पुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्॥

## कलावतारस्य दार्शनिकं प्रयोजनम्

व्यासदेवः भगवतः विष्णोः ज्ञानकलायाः अवतारः अस्ति। ऐश्वर्य-

वीर्यादिभिः षड्गुणैः समृद्धः भगवान् यदा सर्वशक्तीः न प्रकटीकृत्य कस्मिंश्चित् एकस्मिन् एव विशिष्टकार्ये स्वां शक्तिं विनियोज्य अवतरति, तदा सः कलावतारः इति निगद्यते। व्यासदेवस्य अवतारस्य मुख्यं प्रयोजनं ज्ञानसत्रस्य प्रचालनम् आसीत्। कलियुगे मानवानां ह्रासोन्मुखीं प्रज्ञां विचिन्त्य वैदिकज्ञानस्य रक्षणाय, तस्य सरलीकरणाय च स विष्णोः ज्ञानरूपेण धरामवातरत्। प्रज्ञावैशारद्यं साहित्यिकं च वैशिष्ट्यं व्यासस्य प्रज्ञायाः विशालता। तस्य वाग्वैदग्ध्यं च अनिर्वचनीयम् अस्ति। तस्य प्रज्ञावैशारद्यं लक्षीकृत्यैव विद्वद्भिरुच्यते— "व्यासोच्छिष्टं जगत्सर्वम्"। अर्थात् संसारे यत्किमपि ज्ञानं विद्यते तत् सर्वं व्यासदेवस्य मुखात् निर्गतम् । जगति विद्यमानं किमपि ज्ञानं व्यासस्य मेधाशक्त्या अस्पृष्टं नास्ति। किञ्च, श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन उपदिष्टं यत् "मुनीनामप्यहं व्यासः" इति। तेन तस्य व्यासदेवस्य माहात्म्यम् अवगन्तुं शक्यते इति शम् ।

# मोक्षदायिन्यः पुर्यः

आकाशशीटः*

अस्माकं भारतभूमिः पुण्यभूमिः। विविधतीर्थक्षेत्रसमन्विता महापुरुषाणामाविर्भावस्थलभूता च इयं भूमिः। अस्या भूमेः आध्यात्मिकवैभवं जगति सर्वत्र प्रसिद्धं वर्तते। भारतवर्षे स्थितेषु विविधतीर्थस्थानेषु सत्सु काश्चन पुर्यः विशेषतया परमपूताः उच्यन्ते। यासां दर्शनेन तत्रत्यतीर्थसेवनेन च मनुष्यकृतपापानि अपगच्छन्ति, चित्तशुद्धिः जायते, मोक्षप्राप्तिः च भवति इति विश्वासः वर्तते। एताः मोक्षदायिन्यः पुर्यः इति कथ्यते। गरुडपुराणस्य उत्तरखण्डे[१] स्कन्दपुराणे माहेश्वरखण्डे अरुणाचलमाहात्म्ये उत्तरार्धे काम्यकर्मवर्णने[२] एतद्विषये वर्णनं विद्यते। एकः प्रसिद्धः श्लोकः अस्ति। तदुच्यते—

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः॥ इति॥

अस्मिन् श्लोके अयोध्या, मथुरा, माया, काशी, काञ्ची, अवन्तिका द्वारावती चेत्येताः मोक्षदायिन्यः सप्तपुर्यः निर्दिश्यन्ते। अधुना क्रमेण एतासां किञ्चिद् विवरणम् उच्यते।

### अयोध्यापुरी

मोक्षदायिनीषु पुरीषु अन्यतमा इयं नगरी उत्तरप्रदेशराज्ये सरयूनद्याः तीरे

---

* चतुर्थवर्षीयच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य, बेलुडमठस्य।

१ अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
सम्प्राप्य म्रियते तीर्थे पुनर्जन्म न विद्यते॥ [उत्तरखण्डे २८.४]

२ अयोध्यां मथुरां मायां काशीं काचीमवंतिकाम्।
द्वारकां चारुणक्षेत्रमतिशेते न संशयः॥ [माहेश्वरखण्डे ७.५१]

विद्यमाना अस्ति। अयोध्या श्रीरामस्य जन्मभूमिः वर्तते। पुरणानुसारं भगवतः रामस्य स्मरणम्, पूजनम्, तीर्थस्नानादिकं च महत् पुण्यम् अस्ति। एतदाचरणेन मोक्षप्राप्तिः भवति इति विश्वासः वर्तते। प्रतिवर्षं रामनवमी, दीपोत्सवः अन्ये च धार्मिकोत्सवाः महता आडम्बरेण पाल्यन्ते। देशविदेशेभ्यः बहवः भक्तजनाः तत्र समवेताः भवन्ति। अत्र बहूनि दर्शनीयस्थानानि विद्यन्ते, तेषु राममन्दिरम्, नागेश्वरनाथमन्दिरम्, कनकभवनम्, हनुमान्गढी इत्येतानि प्रसिद्धानि।

## मथुरापुरी

इयं पुरी उत्तरप्रदेशराज्ये यमुनानद्याः तटे राजते। अत्र श्रीकृष्णस्य जन्मभूमिः वर्तते। पुराणानुसारं श्रीकृष्णस्य दर्शनम्, पूजनम्, यमुनास्नानादिकं च क्रियते चेत् मनुष्यैः कृतानि पापानि दूरीभवन्ति। मोक्षमार्गे तेषां प्रवृत्तिः भवति। अत्र पुनः जन्माष्टमी, होली, दीपावली इत्यादयः उत्सवाः महोत्साहेन आचर्यन्ते। तत्र बहवः भक्ताः आगत्य योगदानं कुर्वन्ति। नैकेषु स्थानेषु सत्सु श्रीकृष्णमन्दिरम्, गोवर्धन-पर्वतः, प्रेममन्दिरम्, विश्रामघट्टः इत्यादीनि प्रसिद्धानि।

## मायापुरी

मोक्षदायिनीषु पुरीषु इयमपि अन्यतमा उच्यते। मायापुरी इति हरिद्वारनगर्याः प्राचीनं नाम वर्तते। उत्तराखण्डराज्ये गङ्गानद्याः तटे शोभते इयं नगरी। सनातनपरम्परानुसारं श्रद्धा अस्ति यत् गङ्गास्नानम्, देवपुजनम्, दानादिकं च मनुष्यस्य पापानि क्षालयन्ति, एवंविधम् अनुष्ठानं मोक्षप्राप्तौ सहायकं भवति। पुनः गङ्गामातुः सायंकालीनम् आरात्रिकवन्दनम् अत्यन्तं प्रसिद्धमस्ति। प्रतिदिनं सहस्रशः भक्तजनाः तद्दर्शनार्थम् आगच्छन्ति। अपि च अत्र द्वादशवर्षेभ्यः अनन्तरं महता वैभवेन कुम्भमेला आयोज्यते। तत्र स्नानार्थं बहूनां स्नानार्थिनां समारोहः दृश्यते। दर्शनीयतीर्थस्नानानि हि—हर-कि-पौरी,

मानसदेवीमन्दिरम, चण्डीदेवीमन्दिरम्, मायादेवीमन्दिरम् इत्यादीनि।

## काशीपुरी

भारतस्य प्राचीनतमासु नगरीषु अन्यतमा इयं पुरी। अस्याः अवस्थानम् उत्तरप्रदेशराज्ये वाराणस्यां गङ्गानद्याः तटे। अत्र काशीविश्वनाथमन्दिरं वर्तते। सनातनपरम्परानुसारं काश्यां मरणं प्राप्तस्य जीवस्य मोक्षप्राप्तिः भवति इति विश्वासः अस्ति। स्कन्दपुराणस्य काशीखण्डे अपि एतद्विषये विस्तृतं वर्णनं प्राप्यते। अतः नैके वयोवृद्धजनाः मरणात्पूर्वमेव तत्र वासार्थं गच्छन्ति। तेन इयं मोक्षदायिनी इत्युच्यते।

शिवस्य विशेषानुग्रहः अस्याः नगर्याः महत्त्वं वर्धयति। पुनः शास्त्रीयसङ्गीतस्य संस्कृतविद्यायाः च प्राचीना नगरी इत्यपि प्रसद्धिः अस्ति। दर्शनीयक्षेत्राणि हि—काशीविश्वनाथमन्दिरम्, मणिकर्णिकाघट्टः, दशाश्वमेधघट्टः, कालभैरवमन्दिरम् इत्यादीनि।

## काञ्चीपुरी

सप्तसु मोक्षदायिनीषु पुरीषु इयमपि अन्यतमा वर्तते। एषा तमिलनाडुराज्ये काञ्चीपुरनगर्यां विराजते। अत्र विशेषः कः इत्युक्ते इयं सहस्रमन्दिराणां नगरी इत्युच्यते। अस्माकं हिन्दुपरम्परानुसारेण पुराणेषु येषां देवानाम् उल्लेखः प्राप्यते, तेषु प्रायः सर्वेषां मन्दिराणि अत्र विद्यमानानि सन्ति। अतः एतेषां दर्शनम्, तत्रत्यदेवानां पूजनम्, पुनः तत्र वासादिकं च क्रियते चेत् मोक्षप्राप्तिः भवतीति परम्परा वर्तते।

पुनः अस्यां नगर्यां शैव-वैष्णव-शाक्तसम्प्रदायानां समन्वयः दृश्यते। एषा नगरी प्राचीनविद्यायाः, संस्कृताध्ययनस्य दर्शनशास्त्रचर्चायाः च प्रमुखकेन्द्रम् अपि अस्ति। पुनः काञ्ची-कौशेयवस्त्राणि विश्वप्रसिद्धानि सन्ति। बहूनि दर्शनीयस्थानानि वर्तन्ते, तेषु प्रमुखानि हि—कामाक्षीमन्दिरम्,

एकाम्बरेश्वरमन्दिरम्, कैलासनाथमन्दिरम्, कामाक्षी-अम्मन्-मन्दिरम्, काञ्ची-कामकोटि-पीठम् इत्यादीनि।

## अवन्तिकापुरी

मोक्षदायिनी इयं पुरी मध्यप्रदेशराज्ये उज्जयिनीनगरे क्षिप्रानद्याः तीरे शोभते। प्राचीनकाले इयं संस्कृतेः, ज्योतिषशास्त्रस्य च प्रमुखकेन्द्रम् आसीद् इति श्रूयते। सनातनपरम्परानुसारम् अत्र श्रद्धया देवपूजा, पुण्यकर्म, पवित्रस्नानं च कुर्वतः जनस्य मोक्षप्राप्तिः भवतीति विश्वासः अस्ति। अतः एषा मोक्षदायिनी उच्यते। अत्र पुनः महाकालेश्वरज्योतिर्लिङ्गमन्दिरम् अस्ति यत् द्वादशज्योतिर्लिङ्गेषु अन्यतमम्। अपि च अत्र सान्दीपनि-आश्रमः वर्तते, यत्र श्रीकृष्णः बलरामश्च विद्याभ्यासं चक्रतुः इति श्रूयते। पुनः शिप्रानद्याः तटे सिंहस्थ-कुम्भमेला आयोज्यते। अत्र दर्शनीयस्थानानि हि—महाकालेश्वर-ज्योतिर्लिङ्गमन्दिरम्, कालभैरव मन्दिरम्, रामघट्टः, सान्दीपन्याश्रमः इत्यादीनि।

## द्वारावतीपुरी

उल्लिखितासु सप्तपुरीषु अन्तिमा पुरीयं द्वारावती। अस्याः अवस्थानम् अनद्यतने काले आरवसमुद्रतीरे द्वारकामण्डले। विशेषः कः इत्युक्ते द्वारावती भगवतः श्रीकृष्णस्य राजधानी आसीत्। पुराणानुसारं श्रीकृष्णः मथुरातः आगत्य समुद्रतीरे एतां नगरीं स्थापितवान्। यः श्रद्धया द्वारकाधीशस्य दर्शनं स्मरणं करिष्यति, तस्य अन्ते मोक्षप्राप्तिः भविष्यति। तेन इयं मोक्षदायिनी उच्यते। पुनः समुद्रगर्भे प्राचीनद्वारकायाः अवशेषांशाः अधुनाऽपि उपलभ्यन्ते। नैकेषु दर्शनीयस्थनेषु सत्सु प्रमुखानि हि—द्वारकाधीशमन्दिरम्, रुक्मिणीमन्दिरम्, नागेश्वर-ज्योतिर्लिङ्गमन्दिरम्, गोमतिघट्टः इत्यादीनि।

## उपसंहारः

एवम् एतासां सप्तपुरीणां माहात्म्यं पुराणेषु सम्यग्रुपेण प्रतिपादितम्

वर्तते। धर्मार्थकाममोक्षेषु चतुर्विधपुरुषार्थेषु मोक्षः परमपुरुषार्थ उच्यते। तत्प्राप्तये एव मनुष्याणां प्रवृत्तिः भवति। एताः नगर्यः न केवलं धार्मिकदृष्ट्या, अपितु सांस्कृतिकदृष्ट्या तथा ऐतिहासिकदृष्ट्यापि अत्यन्तं महत्वपूर्णाः सन्ति। अतः एतासां संरक्षणं संवर्धनं च सर्वेषां कर्तव्यं भवति। भारतीयसंस्कृतेः आध्यात्मिकवैभवस्य अमुल्याः प्रतीकाः सन्ति इमाः नगर्यः।

दीपशिखा

# प्राचीनभारतीयसंस्कृतौ गुरुशिष्यपरम्परायाञ्च सान्दीपनिमहर्षेः माहात्म्यम्

सौम्यदीपसाधुखाँः*

## प्रस्तावना

भारतीयसंस्कृतिः ज्ञानस्य, धर्मस्य, सदाचारस्य च आधारभूता। अस्याः संस्कृतेः मूलाधारः भवति गुरु-शिष्यपरम्परा। अस्यां परम्परायाम् अनेके महर्षयः, आचार्याः, गुरवः च आसन्, येषां ज्ञानप्रकाशेन भारतस्य सांस्कृतिकं तथा आध्यात्मिकं जीवनं समुन्नतम् अभवत् । तेषु महर्षिः सान्दीपनिः विशिष्टस्थानं धारयति। सः केवलं वेदविद् ऋषिः नासीत्, अपि तु आदर्शः शिक्षकः, चरित्रनिर्माता, धर्मोपदेशकः च आसीत्। तस्य आश्रमे शिक्षिताः शिष्याः ज्ञानेन, विनयेन, धर्मेण, कर्तव्यपरायणतया च विश्वे प्रसिद्धाः अभवन्। विशेषतः श्रीकृष्णः, बलरामः तथा सुदामा इत्येते तस्य प्रमुखाः शिष्याः आसन्।

## महर्षेः सन्दीपनेः जीवनपरिचयः

पुराणेषु तथा प्राचीनग्रन्थेषु महर्षेः सान्दीपनेः नाम आदरपूर्वकं वर्णितम्। तस्य जन्मकालः निश्चितरूपेण न ज्ञायते, किन्तु सः द्वापरयुगस्य महान् ऋषिः इति विद्वद्भिः मन्यते। सः वेदेषु, वेदाङ्गेषु, धर्मशास्त्रे, राजनीतिशास्त्रे, धनुर्वेदे, ज्योतिषे, आयुर्वेदे, व्याकरणे, तर्कशास्त्रे च प्रवीणः आसीत्। तस्य आश्रमः सन्दीपन्याश्रम इति परम्परया प्रसिद्धः। उज्जयिनी प्राचीनकाले विद्यानगरीरूपेण

* तृतीयवर्षीयच्छात्रः, संस्कृतदर्शनविभागः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्, बेलुडमठः, हावडा, पश्चिमवङ्गः।

विख्याता आसीत्। तत्र देशस्य विभिन्नप्रदेशेभ्यः विद्यार्थिनः विद्याध्ययनार्थम् आगच्छन्ति स्म।

### आश्रमजीवनम्

महर्षेः आश्रमजीवनम् अत्यन्तं नियमितम् आसीत्। सर्वे शिष्याः प्रातःकाले उत्थाय स्नानं कृत्वा सन्ध्यावन्दनं कुर्वन्ति स्म। ततः गुरोः समीपे वेदाध्ययनं, यज्ञकार्यं, गोसेवा, वनात् समित्संग्रहः, आश्रमस्वच्छता, अतिथिसत्कारः, ध्यानं, योगाभ्यासः च भवति स्म। शिक्षणस्य उद्देश्यं केवलं परीक्षोत्तीर्णता नासीत्, अपि तु शिष्यस्य सर्वाङ्गीणविकाशः आसीत्। चरित्रनिर्माणम्, आत्मसंयमः, विनयः, सत्यवादिता, परोपकारभावना, कर्तव्यनिष्ठा च शिक्षायाः प्रमुखलक्ष्याणि आसन्।

### श्रीकृष्णस्य तथा बलरामस्य शिक्षणम्

भगवान् श्रीकृष्णः तथा बलरामः बाल्यावस्थायामेव महर्षेः सान्दीपनेः आश्रमं गतवन्तौ। तत्र उभौ ब्रह्मचर्यव्रतं पालयित्वा सर्वाः विद्याः अधिगतवन्तौ। पुराणेषु वर्णितम् अस्ति यत् उभौ अल्पकाले एव चतुःषष्टिकलाः शिक्षितवन्तौ।

तासु कलासु गीतम्, वादनम्, नृत्यम्, चित्रकला, शिल्पकला, धनुर्वेदः, युद्धकला, अश्वविद्या, रथचालनम्, नीतिशास्त्रम्, अर्थशास्त्रम्, ज्योतिषम्, आयुर्वेदः, व्याकरणम्, गणितम्, संवादकौशलम् इत्यादयः विषयाः समाविष्टाः आसन्। एतेन ज्ञायते यत् प्राचीनभारते शिक्षा बहुमुखिनी आसीत्।

### सुदाम्नः शिक्षणम्

सुदामा अपि महर्षेः सान्दीपनेः प्रियः शिष्यः आसीत्। सः अत्यन्तं विनीतः, धर्मनिष्ठः, परिश्रमी च आसीत्। आश्रमे श्रीकृष्णस्य सुदाम्नः च मध्ये दृढा मैत्री अभवत्। तयोः मैत्री भारतीयसाहित्ये आदर्शमित्रतायाः प्रतीकत्वेन प्रसिद्धा अस्ति।

## गुरुदक्षिणाया आदर्शः

विद्यासमाप्तेः अनन्तरं श्रीकृष्णः बलरामश्च गुरवे गुरुदक्षिणां दातुम् ऐच्छताम्। तदा महर्षिः सान्दीपनिः स्वपुत्रस्य समुद्रे नष्टस्य वृत्तान्तं कथयित्वा तम् आनयितुं प्रार्थितवान्। गुरोः आज्ञां शिरसि धृत्वा श्रीकृष्णः समुद्रतीरम् अगच्छत्। तत्र सः समुद्रदेवं दृष्ट्वा गुरुपुत्रस्य विषये पृष्टवान्। समुद्रदेवः अवदत्— "हे कृष्ण! पाञ्चजन्यनामा दैत्यः समुद्रे वसति। स एव तव गुरुपुत्रम् अपहृतवान् इति मम मतिः।"

ततः श्रीकृष्णः समुद्रस्य अन्तः प्रविश्य पाञ्चजन्यनाम्नः दैत्यस्य अन्वेषणम् अकरोत्। स दैत्यं दृष्ट्वा तेन सह तत्र घोरं युद्धम् अकरोत्। अन्ते श्रीकृष्णः तं दैत्यं हत्वा तस्य शरीरात् एकं दिव्यं शङ्खम् अलभत। स एव शङ्खः पाञ्चजन्यः इति प्रसिद्धः अभवत्। श्रीकृष्णः तं शङ्खं गृहीत्वा गुरुपुत्रस्य अन्वेषणं पुनः अकरोत्। ततः स यमलोकं गत्वा गुरुपुत्रं पुनः प्राप्तवान्। गुरुपुत्रं सजीवं दृष्ट्वा सान्दीपनिमुनिः अत्यन्तं प्रसन्नः अभवत्।

श्रीकृष्णः गुरुपुत्रं गुरवे समर्प्य गुरुदक्षिणां पूर्णां कृतवान्। तदा सान्दीपनिः श्रीकृष्णम् आशीर्भिः अभ्यनन्दत्। पाञ्चजन्यशङ्खस्तु तस्मादारभ्य श्रीकृष्णस्य प्रियः शङ्खः अभवत्। महाभारते कुरुक्षेत्रयुद्धे युद्धारम्भे श्रीकृष्णः तमेव पाञ्चजन्यं शङ्खं प्रदध्मौ। एषा कथा गुरुभक्तेः, श्रद्धायाः, कृतज्ञतायाश्च महतः आदर्शस्य प्रतिबिम्बभूता अस्ति।

## महर्षेः शिक्षादर्शनम्

महर्षेः सान्दीपनेः मतानुसारम्—विद्या विनयेन शोभते, चरित्रम् एव मनुष्यस्य श्रेष्ठं भूषणम्, सत्यं धर्मस्य मूलम्, गुरुसेवा विद्याप्राप्तेः प्रथमं सोपानम्, आत्मसंयमः जीवनस्य महत् बलम्, ज्ञानस्य प्रयोजनं लोककल्याणम्। तस्य शिक्षापद्धतिः नैतिकशिक्षा, आध्यात्मिकता, बौद्धिकविकाशः, शारीरिकप्रशिक्षणम् इत्येषां समन्वयेन युक्ता आसीत्।

## गुरुशिष्यसम्बन्धः

महर्षेः सान्दीपनेः जीवने गुरु-शिष्यसम्बन्धस्य आदर्शरूपं दृश्यते। गुरुः शिष्यं पुत्रवत् पालितवान्, शिष्याश्च गुरुम् पितृवत् आद्रियन्ते स्म। ज्ञानं केवलं ग्रन्थेभ्यः न, अपि तु गुरोः आचरणात् अपि लभ्यते इति सः प्रतिपादितवान्।

## भारतीयसंस्कृतौ योगदानम्

महर्षेः सान्दीपनेः योगदानं केवलं श्रीकृष्णस्य शिक्षणपर्यन्तं न सीमितम्। तस्य आदर्शाः भारतीयशिक्षापद्धतेः मूलतत्त्वानि अभवन्। गुरुकुलव्यवस्था, अनुशासनम्, नैतिकशिक्षा, आत्मनिर्भरता, श्रमस्य महत्त्वम्, प्रकृतिसंरक्षणम्, सेवा, समता इत्यादीनां विकाशे तस्य महत्त्वपूर्णं योगदानम् आसीत्।

## उपसंहारः

महर्षिः सान्दीपनिः भारतीयगुरु-शिष्यपरम्परायाः अमरः दीपस्तम्भः अस्ति। तस्य जीवनम् आदर्शगुरोः जीवनम् आसीत्। तेन प्रदत्ता शिक्षा केवलं शास्त्रज्ञानं न, अपितु जीवनं कथं जीव्यते इति बोधयति। श्रीकृष्णस्य, बलरामस्य, सुदाम्नः च चरित्रेषु तस्य शिक्षायाः प्रभावः स्पष्टतया दृश्यते। अतः महर्षिः सान्दीपनिः भारतीयसंस्कृतेः, शिक्षापरम्परायाः नैतिकजीवनस्य च शाश्वतप्रेरणास्रोतः इति निःसंशयं वक्तुं शक्यते।

# महर्षिः वसिष्ठः

भगीरथगराइः*

सप्तसु महर्षिषु आन्यतम्यं भजमानोऽसौ मैत्रावरुण्यपराभिधानो महर्षिर्वसिष्ठो वियदम्भसि श्वेतगरुदिव सनातनवैदिकसंस्कृतेः आध्यात्मिकनभोमण्डले राराज्यमानोऽस्ति। स खलु जगत्स्रष्टुर्ब्रह्मणो मानसपुत्र इति सर्वजनविदितचरमेव। अपि चायं वसिष्ठः परमतत्त्वस्य गभीरतमरहस्यप्रवक्ता। तदीयदैहिकं प्रज्ज्वलितं ब्रह्मतेजः कामक्रोधलोभादीन् जननमरणसन्ततिविकारान् ग्रीष्मकालीनपप्यः पुरतः तुहिनशकलान् इव विदह्य विश्वं विश्वं पावनीचकार। महर्षेरस्य अर्धाङ्गिनी तपोमयी देवी अरुन्धत्यपि तस्यात्मतेजसः प्रतिबिम्बरूपेण विराजते। अनयोः दाम्पत्यबन्धः वासनारहितः केवलं परमार्थसाधनमय आसीत्। अत एव गगनमण्डलेऽपि एतौ नक्षत्ररूपेण निखिलचराचरात्मकलोकस्य अध्वदर्शनं विदधाते।

यत्र शब्दप्रपञ्चः श्रान्तो भवति, बुद्धिश्च कुण्ठिता तत्र महर्षेर्वसिष्ठस्य दिव्यवाणी प्रस्फुटति। तस्य नये दृश्यमानं जगदिदं मनसो विलासमात्रम्, आत्मैव च एकमात्रं शाश्वतं सत्यम्। अयं गूढार्थः पञ्चतत्त्वाञ्चित-वैरिञ्चप्रपञ्चमोह-निमग्नजीवानां कृते परमं सञ्जीवनमस्ति। महर्षिर्वसिष्ठ इक्ष्वाकुवंशस्य तथा रघ्वन्वयस्य कुलगुरुः परमपरामर्शदाता चासीत्। तस्यैव तत्त्वावधाने महाराजो दिलीपः, रघुः, दशरथः एवञ्च स्वयं मर्यादापुरुषोत्तमः श्रीरामचन्द्रः शास्त्रीयज्ञानं शास्त्रविद्याञ्च अलभन्त।

यदा श्रीरामचन्द्रः संसारे वीतस्पृहो भूत्वा वैराग्यं प्राप तदा महर्षिवसिष्ठेन यो

* द्वितीयवर्षीयच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य, बेलुडमठस्य।

गम्भीरवेदान्तदर्शनात्मक उपदेशः प्रदत्तः स एवाधुना “योगवासिष्ठ-रामायणम्” इति नाम्ना प्रपञ्चेऽस्मिन् प्रथितः। एष ग्रन्थो मोक्षकामिनां कृते महदवलम्बनम्। किञ्च, पौराणिकाख्यानुसारेण आदियोगिभगवच्छिवो यदा गुरुरूपेण धराधाम्नि अवततार तदा परमात्मज्ञानप्रदानाय सप्तसंख्याकान् शिष्यान् चिचाय। ते शिष्याः एव सप्तर्षिरूपेण प्रसिद्धिम् अलभत। आषाढमासः पूर्णिमातिथौ भगवाञ्छिव एषु सप्तसु शिष्येषु अखिलब्रह्माण्डस्य गुह्यज्ञानं व्यतनुत। ततःप्रभृति पृथिव्यामस्यां गुरुशिष्यपरम्परायाः सूचनाभवत्।

किञ्च, वसिष्ठविश्वामित्रयोः सुदीर्घः विरोधः क्षात्रबलब्रह्मबलयोः पारमार्थिकं प्रभेदमुद्घाटयति। विश्वामित्रः यदा राजकीयमदमत्तः सम्भूय वसिष्ठस्य दिव्यकामधेनुं नन्दिनीं जिहीर्षुरभवत्। तदा वसिष्ठस्य केवलं ब्रह्मदण्डेनैव तस्य विश्वामित्रस्य समग्रं क्षत्रियोचितबलं चूर्णीकृतम्। एतेन प्रमणितं यद्— धिग्बलं क्षत्रियबलं ब्रह्मतेजो-बलं बलम्। परमतुच्छीकृतोऽपि विश्वामित्रः यदा कठोरतपसा ब्रह्मर्षित्वं प्राप्तवान्, तदा उदारमनाः वसिष्ठः तं प्रथमं ब्रह्मर्षिरित्युपाधिना समलञ्चकार। यत्तस्य असीमक्षमाशीलतायाः परोत्कर्षं दर्शयति। अपि च यः स्वयमेव अपरं “ब्रह्मर्षिः” इति अभिधातुं शक्नोति स खलु ब्रह्मर्षिशिरोमणिरेव।

एवञ्च वेदेषु अपि महर्षेः वसिष्ठस्य महत्त्वपूर्णं स्थानं परिलक्ष्यते। महर्षिर्वसिष्ठो नाम ब्रह्मणो मानसपुत्रेषु प्रमुखतमः, सप्तर्षिमण्डलस्य गौरवभूतः, वैदिकधर्मस्य परमाचार्यः, ब्रह्मविद्यायाः परमोपदेष्टा, ऋत्विजां शिरोमणिश्चाभवत्। तस्य वैदिकसाहित्ये परमोत्कृष्टं स्थानं दृश्यते। ऋग्वेदस्य सप्तममण्डलस्य बहूनि सूक्तानि वसिष्ठगोत्रीयैः ऋषिभिः दृष्टानि, तत्र च महर्षिवसिष्ठस्य आध्यात्मिकप्रज्ञा, यज्ञमीमांसा, देवताभक्तिश्च सम्यगभिव्यज्यन्ते। वसिष्ठस्य वेददर्शनस्य मूलाधारः ऋतस्य परमसिद्धान्तः अस्ति। “ऋतम्” नाम विश्वव्यवस्थायाः सनातनः, नित्यः, अपरिवर्तनीयः च

नियमः, यस्मिन् सर्वे देवाः, लोकाः, भूतानि, कालः, कर्म च प्रतिष्ठितानि सन्ति। वसिष्ठस्य मते सत्यं ऋतस्य प्रकटस्वरूपं, धर्मः तस्य व्यवहाररूपः, यज्ञस्तस्य साधनरूपः, ब्रह्मज्ञानं तस्य परमफलम्।

ऋग्वेदस्य सप्तममण्डले मित्रावरुणयोः, इन्द्रस्य, अग्नेः, सरस्वत्याः, मरुतां च स्तुतयः विशेषप्राधान्येन दृश्यन्ते। तत्र वरुणदेवस्य स्तुतिषु महर्षिः स्वस्य आत्मानं पापक्षालनार्थं दयालुं वरुणं प्रति प्रार्थयति। एषा वैदिकभक्तेः, आत्मपरिशोधनस्य, दैवकृपायाश्च उत्कृष्टा अभिव्यक्तिरिति मन्यते। महर्षेः वसिष्ठस्य मते अग्निर्न केवलं लौकिको वह्निः, किन्तु स एव ज्ञानस्य, तपसः, यज्ञस्य, ब्रह्मतेजसश्च मूर्तिमान् अधिष्ठाता, ब्रह्मविद्याया उपोद्घातः इति तस्य प्रतिपादनम्। इन्द्रविषये वसिष्ठः वीर्यं, शौर्यं, दस्युनिग्रहं, धर्मसंरक्षणं, यज्ञपालनं च स्तौति। इन्द्रः केवलं युद्धदेवता न, अपितु धर्मस्य रक्षकः। एवञ्च सरस्वतीदेवी वसिष्ठदृष्टौ वाग्देवता, प्रज्ञाशक्तिः, ज्ञानप्रवाहस्य दिव्या अधिष्ठात्री देवी। सा कवीनां प्रेरिका, ब्रह्मवादिनां चेतनाशक्तिः, वेदमन्त्राणां प्रकाशिका च परिगण्यते। वसिष्ठस्य दार्शनिकविचारे ब्रह्म परमं तत्त्वम्। देवताः तस्यैव परमात्मनः विविधाः शक्तिप्रकाशाः। यज्ञः, तपः, ब्रह्मचर्यम्, स्वाध्यायः, सत्यपालनम्, दानम्, दमः, शमः, श्रद्धा च ब्रह्मप्राप्तेः साधनानि भवन्ति।

वसिष्ठगोत्रं वैदिकपरम्परायां महत्त्वपूर्णं स्थानमलभत। अस्य गोत्रस्य ऋषयः बहून् मन्त्रान् दृष्टवन्तः, ब्राह्मणग्रन्थेषु, आरण्यकेषु, उपनिषत्सु च वसिष्ठपरम्पराया गौरवं प्रतिपादितम्। वेदानां मन्त्रद्रष्टारः ऋषयः इति वैदिकमतम्। अतः वसिष्ठो न मन्त्रकर्ता, किन्तु मन्त्रद्रष्टा, यः समाधिस्थचित्तेन परमसत्यस्य दिव्यानुभूतिं प्राप्तवान्। तेन दृष्टाः मन्त्राः श्रुतिरूपेण सनातनधर्मस्य मूलप्रमाणत्वं प्राप्तवन्तः। अन्ते महर्षिर्वसिष्ठः वेदपरम्परायाः दीपस्तम्भ इव विराजते। तस्य मन्त्रेषु केवलं देवस्तुतिः न, अपितु विश्वव्यवस्थायाः, धर्मस्य, आत्मविद्यायाः, ब्रह्मज्ञानस्य, लोकमङ्गलस्य च गम्भीरं दार्शनिकचिन्तनं

निहितम्। अत एव स वैदिकर्षीणां मध्ये परमपूज्यः, ब्रह्मर्षीणां शिरोमणिः, सनातनवाङ्मयस्य चिरन्तनः प्रकाशस्तम्भश्च इति सर्वैरभ्युपगम्यते।

दीपशिखा

# गुरुदेवः दक्षिणामूर्तिः सच्चिदानन्दविग्रहः

संजीवगराइः*

## भूमिका

गुरुः केवलं साधारणः शिक्षकः नास्ति, नास्ति च साधारणः जनः। गुरु इति शब्दस्य व्युत्पत्तिः बहुधा निरूप्यते, सामान्यतया गुरुत्वं नाम श्रेष्ठत्वम् इति बोध्यते। व्याकरणव्युत्पत्त्या यस्यार्थः—यः ज्ञाने, गुणे, वयसि, मर्यादायाञ्च श्रेष्ठः; सः गुरुपदवाच्यः। परन्तु एतन्मात्रेण व्यावहारिकतया अस्याः परिभाषायाः स्वीकारेऽपि, तत्त्वतः गुरोः स्वरूपं नैव प्रकाशते। अतः शास्त्रे उच्यते—

“गुशब्दस्त्वन्धकारः स्यात् रुशब्दस्तन्निरोधकः।
अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते॥”

—[अद्वयतारकोपनिषत्, १६]

“गुकारश्चान्धकारो हि रुकारस्तेज उच्यते।
अज्ञानग्रासकं ब्रह्म गुरुरेव न संशयः॥”

—[गुरुगीता, ३३]

“गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः ॥”

—[गुरुगीता, ५८]

शिष्याणाम् अज्ञानान्धकारविनाशकत्वे सति तत्त्वप्रकाशकः परमात्मा गुरुः इति अवधेयः। प्रसङ्गेऽस्मिन् तादृशोऽयं गुरुः शिवावतारः दक्षिणामूर्तिः, सनकादीनाम् ऋषीणां सकाशे प्रतीकत्वेन मौनव्याख्यानेन

---

* शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य, बेलुडमठस्य।

अज्ञानमलनाशपुरःसरम् आत्मतत्त्वम् ज्ञापयति। अत्र उपदेशस्य शैली कीदृशी इत्युक्ते, वयं पश्यामः—शिष्याणां संशयं नाशितुं न तस्य व्याख्यानं न वा भाषणम्, केवलं स्वस्य उपस्थित्या सच्चिदानन्दविग्रहस्य दर्शनमात्रेणैव शिष्याः छिन्नसंशयाः। अतः प्रबन्धेऽस्मिन् संक्षेपेण आलोच्यते विषयोऽयम्।

## पौराणिकी कथा

स्कन्दपुराणस्थे सूतसंहितायां, शिवपुराणे अपि च दक्षिणामूर्त्युपनिषदि एषा कथा विस्तरेण उपलभ्यते, अत्र वयं संक्षेपेण कथासारम् आलोचयामः।

ब्रह्मा तस्य चतुरः मानसपुत्रान् सनक-सनन्दन-सनातन-सनत्कुमारान् सृष्टिकार्याय उत्पादितवान्। परन्तु एते ऋषयः वैराग्यवशात् सृष्टिकार्ये अप्रवृत्ताः सन्तः आत्मज्ञानाय प्रवृत्ताः। वेदादीनां शास्त्राणाम् अध्ययनेनापि यदा तेषां संशयान्धकारः नापगतः आत्मज्ञानलाभाय तृष्णार्ताः सन्तः ते (प्रायः) नारदोपदेशेन हिमालयस्थस्य शिवस्य शरणापन्नाः जाताः। तदा पुराणप्रसिद्ध्यनुसारं करुणाद्रितः शिवः हिमालयस्थे वटवृक्षतले षोडशवर्षीय-बालकत्वेन दक्षिणामूर्तिरूपेण अवतीर्णः। अवतीर्णस्य तस्य सच्चिदानन्दविग्रहस्य केवलं दर्शनमात्रेण उपदेशं विनैव सनकादीनां संशयरूपो मलः नष्टः। अतः आदिशङ्कराचार्येण उच्यते—

"चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः॥"

## दक्षिणामूर्तेः रहस्यम्

भगवान् शिवः उत्तरदिशि हिमालये निवसति; अतः गुरुत्वेन यदा दक्षिणमुखी भूत्वा अवतीर्णः, तदा दक्षिणदिशि मुखावस्थानात् आदिगुरोः मूर्तेः नाम दक्षिणामूर्तिः इति प्रचारितः। शास्त्रीय-परम्परायाम् एषा दक्षिणा दिक् मृत्योः यमस्य वा, अतः संसाररूपस्य वटवृक्षस्य अधः गुरुः दक्षिणामूर्तिः संसारबीजस्य समूलनिरोधपुरःसरं जन्ममृत्युबन्धनमुत्खादयन् साधकान् प्रति

अभयत्वम् अमृतत्वञ्च ज्ञापयति।

अथवा, प्रकारान्तरेणापि वक्तुं शक्यते, दक्षिणा (दक्षा कुशला वा) मूर्तिः यस्य सः दक्षिणामूर्तिः; अर्थात् आलोकेन अन्धकारनाशवत्, दर्शनमात्रेण शिष्यस्य अज्ञानमलं नाशयितुं कुशला ज्ञानप्रदा वा यस्य मूर्तिः स दक्षिणामूर्तिः।

किंवदन्त्यनुसारेण दक्षिणामूर्तेः हस्तचतुष्टये विद्यमानानि वस्तूनि भगवन्तं शिवम् आदिगुरुत्वेन प्रतिपादयन्ति। यतो हि, प्रायः उपरि स्थितस्य दक्षिणहस्तस्य अक्षमाला साधनायां निरन्तरतायाः प्रतीकः; अधःस्थितस्य दक्षिणहस्तस्य ज्ञानमुद्रा वृद्धाङ्गुष्ठ-तर्जन्योः मेलनेन जीव-परमात्मनोः एकात्मकतायाः प्रतीकः; उपरि स्थितस्य वामहस्तस्य अग्निः ज्ञानाग्निना अज्ञाननाशस्य प्रतीकः; अधःस्थितस्य वामहस्तस्य पुस्तकं वेदग्रन्थः वा समग्रस्य ज्ञानस्य प्रतीकः।

एवं प्रकारेण दक्षिणपदमर्दितः अपस्मारासुरः जीवानाम् अहंकारस्य मोहस्य वा प्रतीकः। यतो हि, स्मरणम् (चेतनाम्) अपस्मारयति विलोपयति वा यः सः अपस्मारः। तस्य काम-क्रोध-लोभ-मोहादिरूपस्य अपस्मारासुरस्य दक्षिणपदेन निरोधे सति संकेततया गुरुः दक्षिणामूर्तिः साधकानाम् अन्तःकरणं शुद्धीकरोति। अनेन शुद्धान्तःकरणेन साधकः परमात्मानं ज्ञातुं समर्थो भवति।

पुनश्च दर्पणे यथा स्वरूपं प्रतिफलति तथैव साधकानां हृत्पुण्डरीकस्थः परमात्मा दक्षिणामूर्तौ सच्चिदानन्दरूपेण प्रतिफलति। अतः आपातदृष्ट्या उपदेशाभावेऽपि, वाचा अव्यक्तः ज्ञानस्वरूपः परमात्मा अपरोक्षत्वेन मौनव्याख्यानेन स्वतः स्वयमेव प्रकाशते।

## उपसंहारः

वर्तमानसमये समाजस्य लौकिकोन्नतिः अपि च तथ्यानां प्राचुर्यं (ज्ञानभाण्डारस्य प्राचुर्यम्) विद्यते, तथापि प्रज्ञायाः आत्मज्ञानस्य वा अभावः दृश्यते। अतः अत्रैव आदिगुरोः दक्षिणामूर्तेः प्रासङ्गिकता आपतति। प्रबन्धेऽस्मिन् ज्ञायते, दक्षिणामूर्तिः केवलम् एकस्य जनस्य मूर्तिः नास्ति अपि तु मनुष्याणाम्

अन्तःस्थितस्य शुद्धचैतन्यस्य गुरुरूपेण बहिःप्रकाशः। बाह्यः गुरुः शिष्यस्य अन्तः विद्यारूपिणं परमगुरुं दक्षिणामूर्तिमेव जागरयति। अनेनैव समस्तज्ञान-वैराग्य-आत्मज्ञानानां महासमन्वयः दक्षिणामूर्तिः भारतीयपरम्परायाम् आदिगुरुत्वेन प्रसिद्धिम् अधिगच्छति।

# श्रीगुरुस्तुतिः

सुरजित्-प्रामाणिकः*

अस्माकं दृढ इन्द्रवज्रसदृशोऽज्ञानान्धकारोऽस्ति च
सर्वेषां न तु सिद्ध्यतीत्यवसरे प्रज्ञा नृरूपेऽपि च।
तद्यस्योपरि केवलं गुरुकृपा तस्यैव संज्ञा भवेत्
तस्मात्त्वं शरणागतिर्मम गुरो सेवे गुरुं सर्वदा ॥१॥

रात्रौ वस्तु यथा तु गूढतमसि स्पष्टं न तद्दृश्यते
प्रातःकालरविर्यदा तु नभसि नूनं तमो लीयते।
तद्वद्यद्भवता तमो मम हृदि क्षिप्रं बृहत् नाशितं
तस्मात्त्वं शरणागतिर्मम गुरो सेवे गुरुं सर्वदा ॥२॥

अज्ञानेन वयं विवेकरहिताः कालस्य चक्रे स्थिताः
तस्माद्दुःखमयीं जनिं च भगवन् प्राप्यैव मायावृताः।
मायाकल्पितचक्र एव च तमो हन्तुं त्वया शक्यते
तस्मात्त्वं शरणागतिर्मम गुरो सेवे गुरुं सर्वदा ॥३॥

अज्ञानं तु निहत्य तत् सपदि मे ज्ञानं त्वया ज्वालितम्
संसारस्य च कारितं हि भगवन् पारं समुद्रस्य तु।
त्वं माता च पिता सदा शरणदः सर्वत्र हि त्वं स्थितः
तस्मात्त्वं शरणागतिर्मम गुरो सेवे गुरुं सर्वदा ॥४॥

* द्वितीयवर्षीयच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य, बेलुडमठस्य।

इमां गुरुस्तुतिं रम्यां यः पठेद्गुरुसन्निधौ।
सर्वदुःखाद्विमुक्तः सन् मुक्तिं समधिगच्छति ॥५॥

दीपशिखा

# गुरुप्रशंसापञ्चकम्

ऋतेश-साँतराः*

गुरुर्ज्ञानप्रदाता च तमोहन्ता प्रदीपवत् ।
सर्वदेवमयं देवं वन्देऽहं परमं गुरुम् ॥१ ॥

गुरुं विना न कोऽप्यस्ति संसारे सत्यदर्शकः ।
सत्यबोधविधात्रे च गुरवे सततं नमः ॥२ ॥

गुरोर्वाणी सदा रम्या सत्यज्ञानप्रकाशिका ।
सदा गुरुं नमस्कुर्यात् सर्वज्ञानमयं प्रभुम् ॥३ ॥

गुरुकृपा हि लोकेऽस्मिन् परमं रक्षणं स्मृतम् ।
शान्तं ज्ञानमयं देवं वन्देऽहं परमं गुरुम् ॥४ ॥

ज्ञानदं करुणामूर्तिं सर्वलोकहितैषिणम् ।
सर्वदा पूजितं देवं वन्देऽहं परमं गुरुम् ॥५ ॥

* द्वितीयवर्षीयच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य, बेलुडमठस्य ।

# अद्वैतवेदान्ते गुरुपरम्परा

अङ्कुरच्याटार्जी*

## भूमिका

भारतीयशिक्षापरम्परायाः मूलाधारभूता गुरुशिष्यपरम्परा केवलं ज्ञानस्य सम्प्रेषणस्य माध्यममेव नासीत्, अपितु शिष्यस्य चरित्रनिर्माणस्य, जीवनमूल्यानां संवर्धनस्य, नैतिकतायाः विकासस्य च महत्त्वपूर्णं साधनमपि आसीत्। प्राचीनकालादारभ्य आधुनिकयुगपर्यन्तं कालपरिवर्तनानुसारं गुरुशिष्यपरम्परायाः स्वरूपे तथा भूमिकायां परिवर्तनं जातम्। सनातनधर्मदर्शने ज्ञानं न केवलं सूचनाप्राप्तेः अथवा सूचनासञ्चयस्य साधनम्, अपितु आत्मविकासस्य, विवेकजागरणस्य, आत्मसाक्षात्कारस्य, अन्ततः मोक्षप्राप्तेश्च साधनम् इति प्रतिपाद्यते।

गुरुशिष्यपरम्परायां गुरुः केवलं विषयज्ञानप्रदाता शिक्षकः नासीत्, अपितु शिष्यस्य जीवनस्य मार्गदर्शकः, संरक्षकः, प्रेरकः, आदर्शपुरुषश्च आसीत्। शिष्यश्च केवलं पुस्तकीयज्ञानं न अधिगच्छति स्म, अपितु धैर्यं, साहसं, आत्मसंयमं, अनुशासनं, नैतिकतां, कर्तव्यबोधं तथा समाजं प्रति उत्तरदायित्वभावनां च आत्मसात् करोति स्म। स्वामिविवेकानन्दस्य मातृशारदादेव्याश्च छुरिकासम्बन्धिनी घटना अस्याः परम्परायाः सजीवमुदाहरणरूपेण उपस्थाप्यते। अस्यां घटनायां गुरुणा शिष्यस्य साहसस्य, मानसिकसन्तुलनस्य, विवेकस्य च परीक्षणं कृतम्, येन स जीवनस्य प्रत्येकं क्षेत्रे स्वस्य उद्देश्यं दृढनिष्ठया, धैर्येण, शान्ततया च साधयितुं समर्थो भवेत्।

* चतुर्थवर्षीयच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य, बेलुडमठस्य।

एवमेव आचार्यचाणक्यस्य चन्द्रगुप्तमौर्यस्य च सम्बन्धः गुरूशिष्यपरम्परायाः प्रभावस्य महत्त्वपूर्णमुदाहरणम् अस्ति। चाणक्येन चन्द्रगुप्तस्य न केवलं राजनीतिशास्त्रे राज्यशासनकौशले वा प्रशिक्षणं कृतम्, अपितु तस्य नेतृत्वक्षमतायाः, आत्मविश्वासस्य, कर्तव्यनिष्ठायाश्च विकासः अपि साधितः। तक्षशिलानालन्दादीनां प्राचीनविद्याकेन्द्राणि च भारतीयज्ञानपरम्परायाः गौरवपूर्णानि प्रतीकानि आसन्, यत्र ज्ञानस्य विविधशाखानां अध्ययनेन सह शिष्याणां व्यक्तित्वनिर्माणे, अनुशासने, नैतिकमूल्येषु, नेतृत्वगुणेषु च विशेषं बलं प्रदीयते स्म।

## प्राचीनभारते गुरुशिष्यसम्बन्धः कथम् आसीत्?

प्राचीनभारते गुरोः शिष्यस्य च सम्बन्धः अत्यन्तम् आदर्शः आसीत्। तयोः सम्बन्धः पितृ–पुत्रयोः सम्बन्धवत् आसीत्। शिष्यः स्वस्य आचार्यं पितृतुल्यं मातृतुल्यं च मन्यते स्म। सः कदापि आचार्यं प्रति द्रोहं न कुर्यात्। आचार्यस्य आज्ञां पालयेत् तथा च तस्य सम्मानं कुर्यात्।

आचार्यस्य उच्चस्थानस्य उल्लेखः महाभारतेऽपि दृश्यते। तत्र आचार्यस्य महत्त्वं तथा गौरवं स्पष्टतया प्रतिपादितम् अस्ति। मनुस्मृतावपि गुरु–शिष्यसम्बन्धस्य महत्त्वं वर्णितम् अस्ति। मनुस्मृतेः अनुसारं विद्या ब्राह्मणस्य समीपम् आगत्य कथयति— “अहं तव कोशः अस्मि। मम रक्षणं कुरु। मां निन्दकानां हस्ते मा ददातु। यं त्वं पवित्रं जितेन्द्रियं ब्रह्मचारिणं मन्यसे, तस्मै मां पाठय।”

मनुस्मृतेः अनुसारं द्विजबालकस्य द्वे जन्मनी भवतः। प्रथमं जन्म मातुः गर्भात् भवति। द्वितीयं जन्म उपनयनसंस्कारात् भवति। द्वितीयं जन्म ज्ञानस्य प्राप्तये भवति। अस्मिन् द्वितीये जन्मनि गायत्री तस्य माता भवति, आचार्यः च तस्य पिता भवति। अतः आचार्यस्य स्थानं प्राचीनभारतीयशिक्षाव्यवस्थायाम् अत्यन्तं महत्त्वपूर्णम् आसीत्। मनुस्मृतौ कथितम् अस्ति यत् उपनयनसंस्काराद्

अनन्तरं विद्यार्थिनः द्वितीयं जन्म भवति। शिष्यः गुरोः समीपं गत्वा अध्ययनं कृत्वा तस्मै शुल्कं न ददाति स्म। अपि तु गुरुः स्वयमेव शिष्याय भोजनं वस्त्रादीनि च दत्त्वा तस्य साहाय्यं करोति स्म।

शिष्यस्य रोगे गुरुः तस्य सेवां करोति स्म तथा च औषधैः तस्य उपचारं करोति स्म। शिष्यः गुरोः परिवारस्य सदस्य इव तस्य गृहे निवसति स्म। स गृहकार्येषु गुरोः साहाय्यं करोति स्म। शिष्यः गुरोः कृते भिक्षां याचति स्म तथा च गुरोः आज्ञां पालयितुं सदा उद्यतः भवति स्म। स गुरोः निन्दां कर्तुं न शक्नोति स्म तथा च गुरोः निन्दां श्रोतुमपि न शक्नोति स्म।

इदानीम् अद्वैतवेदान्ते गुरुपरम्पराविषये यथामति प्रस्तूयते। अद्वैतवेदान्ते का गुरुपरम्परा इति आलोच्यमाने आदौ अयं श्लोकः विद्वद्भिः उच्यते —

नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम्॥
श्रीशङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम्।
तं तोटकं वार्त्तिककारमन्यान् अस्मद्गुरून् सन्ततमानतोऽस्मि॥

तत्र गुरुपरम्परा एवम् अस्ति—आदौ नारायणः विष्णुः, ततः क्रमेण ब्रह्मा, वसिष्ठः, शक्तिः, पराशरः, वेदव्यासः, शुकदेवः, गौडपादाचार्यः, गोविन्दभगवत्पादः, श्रीमच्छङ्करभगवत्पादः, अपि च श्रीमच्छङ्करभगवत्पादस्य शिष्याः पद्मपादाचार्यः, हस्तामलकाचार्यः, तोटकाचार्यः, सुरेश्वराचार्यः च।

इदानीम् उपर्युक्तानाम् आचार्याणां कालविषये ग्रन्थविषये च किंचित् विचार्यते। परन्तु नारायणः, ब्रह्मा, वसिष्ठः, शक्तिः, पराशरः, वेदव्यासः, शुकदेवः, एते पौराणिकवैदिकमहर्षयः सन्ति। तेषाम् ऐतिहासिककालः निश्चितरूपेण ज्ञातुं न शक्यते। अतः तेषां कालनिर्णये विद्वत्सु मतभेदाः सन्ति। इदानीं नारायणादीनां पौराणिकवैदिकमहर्षीणां प्रमुखग्रन्थविषये उच्यते— नारायणस्य नारायणीयम्, वसिष्ठस्य योगवसिष्ठः,वसिष्ठस्मृतिः, पराशरस्य

विष्णुपुराणम्, पराशरस्मृतिः, बृहत्पाराशरहोराशास्त्रम्, व्यासस्य महाभारतम्, ब्रह्मसूत्राणि, अष्टादशपुराणानि, श्रीमद्भागवतं च।

इदानीं गौडपादाचार्याणां कालविषये ग्रन्थविषये च अत्रोच्यते। आदौ तावत् गौडपादाचार्यः। आचार्यस्य कालः प्रायः षष्ठी-सप्तमी ईशवीय-शताब्दी। तस्य कृतिः इत्युक्ते माण्डूक्यकारिका इति। द्वितीयः गोविन्दभगवत्पादः, तस्य कालः प्रायः सप्तमी-अष्टमी ईशवीय-शताब्दी। तस्य स्वतन्त्रग्रन्थः निश्चितरूपेण उपलब्धः नास्ति। तृतीयः वेदवेदान्तविदां वरः सर्वतन्त्रस्वतन्त्रः अद्वैतसिद्धान्तप्रदीपः श्रीमच्छङ्करभगवत्पादः। आचार्यस्य विषये यत्किमपि वदामि तत् स्वल्पम् एव।

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्॥

आचार्यस्य सामर्थ्यं कथम् आसीत् इति अनेनैव श्लोकेन ज्ञायते। श्रीमच्छङ्कराचार्यः भारतीयदर्शनपरम्परायाः महान् आचार्यः आसीत्। सः अद्वैतवेदान्तस्य प्रमुखः प्रतिपादकः आसीत्। तेन उपनिषदां, भगवद्गीतायाः, ब्रह्मसूत्रस्य च भाष्याणि विरचितानि। तस्य दर्शनस्य मूलसिद्धान्तः “ब्रह्म सत्यं जगन्मिथ्या, जीवो ब्रह्मैव नापरः” इति प्रसिद्धः।

शङ्कराचार्यः भारतस्य विभिन्नेषु प्रदेशेषु भ्रमित्वा अद्वैतवेदान्तस्य प्रचारं कृतवान्। तेन ज्ञानमार्गस्य महत्त्वं प्रतिपादितम्। सः अनेकान् स्तोत्रग्रन्थान् अपि अरचयत्। भारतस्य आध्यात्मिक–दार्शनिकक्षेत्रे तस्य योगदानम् अत्यन्तं महत्त्वपूर्णम् अस्ति। अतः श्रीमच्छङ्कराचार्यः दार्शनिकः, भाष्यकारः, आध्यात्मिकगुरुः तथा अद्वैतवेदान्तस्य महान् आचार्यः इति भारतीयपरम्परायां प्रसिद्धः अस्ति। सः भारतस्य विभिन्नेषु प्रदेशेषु भ्रमणं कृत्वा वैदिकधर्मस्य तथा अद्वैतवेदान्तस्य प्रचारं कृतवान्। तेन भारतस्य चतुर्षु दिशासु मठपरम्परायाः स्थापना कृता इति परम्परया मन्यते। एते

मठाः अद्यापि भारतीयसनातनपरम्परायाः संरक्षणे महत्त्वपूर्णां भूमिकां निर्वहन्ति। स शृङ्गेरी, द्वारका, पुरी, ज्योतिर्मठ इति चतुरः मठान् स्थापितवान्। आचार्यस्य कालः प्रायः ७८८-८२० ई०। तस्य कृतयः—ब्रह्मसूत्रभाष्यम्, भगवद्गीताभाष्यं, दशोपनिषद्भाष्याणि, उपदेशसाहस्री, विवेकचूडामणिः, आत्मबोधः, दक्षिणामूर्तिस्तोत्रम् इत्यादयः।

श्रीमच्छङ्कराचार्यस्य प्रमुखाः चत्वारः शिष्याः आसन्। ते हि पद्मपादाचार्यः, हस्तामलकाचार्यः, तोटकाचार्यः, सुरेश्वराचार्यः च। पद्मपादाचार्यस्य कालः आसीत् अष्टमी-नवमी ई.शताब्दी, तस्य कृतिः पञ्चपादिका इति। अयम् आचार्यः विजयडिण्डिमनामकं भाष्यव्याख्यानं व्यरचयत्। परन्तु दैवात् सम्पूर्णव्याख्यानं न प्राप्यते, केवलं चतुर्थसूत्रान्तभागस्य पञ्चपादिका टीका उपलभ्यते। कथम् अस्य ग्रन्थस्य नाम पञ्चपादिका इति विषये मतभेदो वर्तते। केषाञ्चित् मते दैवदुर्विपाकात् परं श्रुतिधराः शङ्कराचार्याः पद्मपादाचार्यात् पूर्वं श्रुतं द्वितीयाध्यायस्य प्रथमपादपर्यन्तं पञ्चपादानां व्याख्यानं पुनः अलेखयन्। अतः अस्याः टीकायाः पञ्चपादिका इत्यभिधानम्। किन्तु द्वितीयाध्यायस्य प्रथमपादान्तभागस्य टीका अद्यापि नोपलभ्यते। अन्येषां मते यथा चिकित्साशास्त्रे रुग्णः, भेषजं , वैद्यः, परिचारकः, परिचर्या इति पञ्च पादाः मुख्याः तथा वेदान्तशास्त्रेऽपि अध्यासः, ब्रह्मविचारः , ब्रह्मलक्षणं , ब्रह्मविषयकप्रमाणं, वेदान्तवाक्यानां ब्रह्मणि समन्वयः इति पञ्च पादाः मुख्याः। चतुःसूत्र्याम् एते पञ्च पादाः विशेषेण व्याख्याताः इत्यतः अस्याः पञ्चपादिका इत्याख्या।

श्रीमच्छङ्कराचार्यस्य द्वितीयः शिष्यः हस्तमलकाचार्यः। तस्य कालः आसीत् अष्टमी-नवमी ई.शताब्दी, तस्य कृतिः हस्तामलकीयम्। तृतीयः शिष्यः तोटकाचार्यः। तस्य कालः आसीत् अष्टमी-नवमी ई.शताब्दी, तस्य कृतयः—श्रुतिसारसमुद्धरणम्, तोटकाष्टकम्। चतुर्थः शिष्यः सुरेश्वाराचार्यः।

तस्य कालः आसीत् अष्टमी-नवमी ई.शताब्दी, तस्य कृतयः—नैष्कर्म्यसिद्धिः, बृहदारण्यकोपनिषद्-भाष्यवार्तिकम्, तैत्तिरीयोपनिषद्-भाष्यवार्तिकम्, पञ्चीकरणवार्तिकम्।

अनन्तरकाले अद्वैतवेदान्तस्य द्वे प्रमुखे प्रस्थाने विकसिते—भामतीप्रस्थानं तथा विवरणप्रस्थानम्। भामतीप्रस्थानस्य प्रवर्तकः वाचस्पतिमिश्रः तथा विवरणप्रस्थानस्य प्रवर्तकः प्रकाशात्मयतिः ।

एवं प्रकारेण अद्वैतवेदान्ते गुरुपरम्परा कीदृशी अस्ति इति अत्र यथामति प्रतिपादितम्। अतः गुरुपरम्परा केवलं गुरुशिष्यसम्बन्धस्य परम्परा न, अपितु ब्रह्मविद्यायाः, ज्ञानस्य, साधनायाः च अखण्डा परम्परा अस्ति। अद्यापि अद्वैतवेदान्तस्य अध्ययन–अध्यापनयोः अस्याः परम्परायाः महत्त्वं पूर्ववत् एव वर्तते इति शम्।

# पाणिनीयव्याकरणे गुरुपरम्परा

सायनदासः*

## भूमिका

प्रवाहमानायां संस्कृतपरम्परायां संस्कृतव्याकरणस्य चर्चा बहुप्राचीना वर्तते। तत्र "अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्" इति या उक्तिः भर्तृहरिणा कृता तया ज्ञायते यद् ब्रह्मात्मकस्य शब्दतत्त्वस्य उत्पत्तिः विनाशो वा नास्ति। यद्यपि नित्यब्रह्मात्मकशब्दराशीनां व्युत्पत्तिः व्याकरणेन क्रियते तथापि इयम् "असत्ये वर्त्मनि स्थित्वा ततः सत्यं समिहते" इति वचनानुरोधादेव। यतो हि वेदस्य नित्यत्वात् तस्य अङ्गस्य मुखरूपव्याकरणस्यापि नित्यत्वमेव विद्यते। अतः व्याकरणस्य मुख्यं कार्यमस्ति प्रकृतिप्रत्यययोः अन्तः विद्यमानस्य ब्रह्मरूपस्याऽर्थस्य प्रकाशनम् इति। प्राचीनाचार्याणां वचनेभ्यः ज्ञायते यद् अयं शिवदत्तस्य व्याकरणस्य आक्षरिकोपदेशः। ततः ब्रह्मा तां विद्यामधिजगे। तस्मात् अन्ये इति परम्पराविषये उच्यते— ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय, भारद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः इति। महाभाष्यकारः भगवान् पतञ्जलिः अपि उवाच— बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम इति। इन्द्रस्य व्याकरणाध्ययनविषये वेदेऽपि उक्तं— "वाग् वै पराच्यव्याकृता अवदत्। ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुरु" इति।

ननु यदि अन्तं न प्राप्तवान् तर्हि इयं परम्परा कथमारभ्यते इति प्रश्ने उच्यते— किञ्चित्सामान्यविशेषलक्षणं प्रवर्त्यम् इति, तच्च पाणिनिना आरब्धम् आसीत्

* शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य, बेलुडमठस्य।

तस्य अष्टाध्यायी इत्यस्मिन् ग्रन्थे। पुरा कथा असीत् नन्दनृपतेः समयकाले पाटलिपुत्र-नगरे वर्षः इति नामकः कश्चित् गुरुः आसीत्, तस्मात् विद्याधनलाभाय पाणिनिः तस्य वर्षस्य समीपं जगाम। तत्र पाणिनिः सनकादिना सह महेश्वरस्य आराधनां चकार। ततः महेश्वरप्रसादात् स पाणिनिः चतुर्दशसूत्रात्मकं वर्णसमाम्नायं लेभे। तथाहि उच्यते—

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।**
**उद्धर्त्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥**

पाणिनिः तेन अष्टाध्यायीं विरचयामास। ततः तस्याः अष्टाध्याय्याः उपरि कात्यायनः वार्त्तिकं चकार। वार्त्तिककारस्य पाणिनीयव्याकरणे महत्वपूर्णं स्थानं विद्यते, यथा— सुद्ध्युपास्यः इत्यत्र "संयोगान्तस्य लोपः" इत्यनेन यकारस्य लोपे प्राप्ते वार्त्तिककारेण उक्तं "यणः प्रतिषेधो वाच्यः" इति। तथाहि उक्तम्—

**उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।**
**तं ग्रन्थं वार्त्तिकं प्राहुर्वार्त्तिकज्ञा मनीषिणः॥**

ततः महाभाष्यकारः पतञ्जलिः पाणिनीयाष्टाध्याय्याः किञ्च वार्त्तिकग्रन्थस्य उपरि महाभाष्यं विरचयामास। इदं पञ्चाशीत्याह्निकात्मकं महाभाष्यं पाणिनीयव्याकरणस्य अतिगूढत्वं प्रतिपाद्य भगवतः पतञ्जलेः प्रतिभां तीक्ष्णमनीषां सुकुमारशैलीम् अर्थगूढतां च प्रतिपादयति। महाभाष्ये भगवता पतञ्जलिना पाणिनीयव्याकरणविषये उक्तं "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्" इति।

भाष्यस्य उपरि कैयटाचर्यः प्रदीपः इति टीकां चकार। तामेव आधारीकृत्य नागेशः नव्यवैयाकरणः प्रदीपोद्यतः इति टीकां विरचितवान्, यत्र भाष्यप्रदीपयोः अर्थः स्फुटतया अवगम्यते। आचार्यभट्टोजिदीक्षितः अपि भाष्यस्य उपरि शब्दकौस्तुभः इति व्याख्यां रचितवान्। प्राचीनवैयाकरणः भर्तृहरिः तस्य

वाक्यपदीयम् इति ग्रन्थम् अपि महाभाष्यमाधारीकृत्यैव अरचयत्।

एवं क्रमेण पाणिनीयव्याकरणस्य परम्परा दृश्यते। शिवस्य आशीर्वादादेव इयं परम्परा आरब्धा आसीत्। तस्मात् परमगुरुः तु शिव एव। ततः पाणिनिः कात्यायनः पतञ्जलिः इति मुनित्रयक्रमः। तत्रोच्यते— "यथोत्तरं मुनीनां प्रामाण्यम्" इति। तेन पूर्वाचार्याणामर्थः उत्तराचार्येण प्रतिपाद्यते। ततः कैयटः स्वटीकाद्वारा भाष्यार्थस्य प्रतिपादनं करोति किञ्च नागेशः तस्य उपरि स्वमतं प्रतिपादयति।

# श्रीमद्विवेकानन्दस्वामिनां चरितम्
## १. दत्त-परिवारः

स्वामिजपसिद्धानन्दः*

अस्ति भारतवर्षे वङ्गराज्यं नाम मनीषिणां क्रान्तिवीराणां च आयतनम्। वङ्गेषु वर्धमानमण्डलस्य ‘काल्ना’-जनपदे आसीत् ‘डेरेटोना’ इति कश्चन ग्रामः। अयं दत्तवंशीयानाम् अभिजनः। ‘दत्त’ इत्येतत् कुलस्य नाम। वङ्गेषु दत्तकुलं कायस्थेषु परिगण्यते। तत्कुले संजातानां नाम ‘दत्त’ इति उपाधिना संयुज्यते। यथा विश्वनाथ-दत्तः, नरेन्द्रनाथ-दत्तः इत्यादि। यवनानां मोगल्-शासकानां समयाद् दीर्घकालं यावत् दत्तकुलजाः ‘डेरेटोना’-ग्रामे स्वच्छन्दं सुखेन जीवन्ति स्म। ते एव तस्य ग्रामस्य प्रायेण भूस्वामिनः बभूवुः। दत्ताः बलवन्तः, धनाढ्याश्च। आ बहोः कालात् दत्तकुलीनाः दानेन, विद्यया, स्वाधीनचेतसा च विख्याताः। अस्मिन्नेव कुले प्राज्ञस्य विश्वनाथ-दत्तस्य पुत्ररूपेण जनिम् अलभत नरेन्द्रनाथ-दत्तः यः पश्चात् श्रीस्वामि-विवेकानन्दनाम्ना लोकपूजितः अभूत्।

नरेन्द्रनाथस्य पूर्वजाः अपि ‘डेरेटोना’-ग्रामे अवसन्। कालेन यदा भारते ब्रिटिश्-शासनम् आरब्धं तदा ‘डेरेटोना’-ग्रामं विहाय दत्ताः यथायोग्यं स्थानान्तरं गतवन्तः। तेषु रामनिधि-दत्तः स्वपुत्रपौत्राभ्यां सह कोल्कतानगरं समाजगाम। तत्र तेन निजं निकेतनं निर्मातव्यम् आसीत्। तावत्कालं गड-गोविन्दपुरे सः वस्तुं योग्यं किञ्चन वास्तव्यं चकार। कोल्कत्तानगरे सः कस्मिंश्चित् उच्चे पदे अधिष्ठितः। नगरस्य उत्तरभागे सिमुलिया (सिम्ला) नाम स्थाने सः मधुरायनामिकायां वीथ्यां

* संयुक्ताध्यापकः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य, बेलुडमठस्य।

स्वीयभवनस्य निर्माणम् आरब्धवान्। भवनस्य निर्माणकार्ये सम्पन्ने सति गड-गोविन्दपुरगृहाद् आगम्य सः नवीननिवासे सपरिवारः न्यवसत्। रामनिधेः पुत्रः रामजीवन-दत्तः अपि किञ्चन उच्चं पदम् अधिचकार, पौत्रः रामसुन्दर-दत्तोऽपि कस्यचिद् भूस्वामिनः ‘दिवान्’ आसीत्।

रामसुन्दरस्य पञ्च पुत्राः। ज्येष्ठपुत्रः राममोहन-दत्तः विद्यावान् लब्धप्रतिष्ठश्च। सः कस्यचन ब्रिटिश्-अधिवक्तुः सहचरः प्रबन्धकः च बभूव। तया वृत्त्या सः महतीं सम्पदं समाकलयामास। ततः सः सिम्लाविभागे तृतीये गौरमोहन-मुखार्जी-मार्गे विशालं भूभागम् अधिगम्य तत्र स्वकीयं बृहद् भवनं निरमात्। परिवारजनैः परिवृतः सः तस्मिन् प्रासादे सुखेन न्यवसत्। गृहस्य प्राचीरस्य अन्तः भूपरिमाणम् आसीत् सार्धैकं 'बिघा'-मितम्[१]। भवनस्य दक्षिणमार्गाभिमुखं सुमहत् प्रवेशद्वारं नेपालदेशस्य सालवृक्षैः निर्मितं रराज।

आढ्यजनयोग्ये अस्मिन् सद्मनि प्रविष्टस्य अनुपदम् एव विशालं प्राङ्गणं प्रावर्तत। तस्य पूर्वभागे पश्चिमाभिमुखं देवमन्दिरम् अद्योतत। तन्मन्दिरस्य पुरतः पञ्च स्वलङ्कृताः स्तम्भाः शोभन-प्रवेशान् कल्पयन्तः स्थिताः। मन्दिरस्य उपरितले दक्षिणे बृहत् प्रकोष्ठाः। तेषु उत्तरवर्ती प्रकोष्ठः गोष्ठीगृहम्, दक्षिणे देवालयः इत्यादिप्रकारेण यथानुकूलं विनियोगः। प्राङ्गणस्य अन्तः वितर्दिः, प्रकोष्ठाः, पुंसां स्त्रीणां च पृथक् गृहाणि, महानसम्, नारीसेव्या पुष्करिणी इत्यादिभिः यथोपयोगं प्रविभागसंशोभि सदनं तत्। बहुभूमे वेश्मनि तस्मिन् द्वितीयतले महिलानाम् आवासः। प्राचीनपद्धत्या गृहिण्यः जवनिकया आवृते अन्तर्गृहे वसन्ति स्म। पर्वदिनेषु प्राङ्गणे प्रवर्तमानम् उत्सवादिकं ताः जवनिकायाः पृष्ठतः स्थित्वा एव वीक्षन्ते स्म। पूजादिवसेषु राममोहनस्य समग्रं गृहं शङ्ख-घण्टा-ढक्कानिनादैः प्रतिध्वनति स्म।

---

१ वङ्गेषु साम्प्रतम् एक-बिघा=०.३३ एकर्-मिता भूमिः। अतः प्रायेण अर्ध-एकर्-मिते भूतले तद् भवनं निर्मितम् इति प्रतीयते।

इमं प्रासादम् अतिरिच्य स्थानान्तरेषु तस्य इतोऽपि भूसम्पद् बभूव। तद्यथा गृहस्य पार्श्वे द्वितीये गौरमोहन-मुखार्जी-मार्गे काठा-चतुष्टयमितभूमौ[२] आसीत् तस्य अश्वशाला। हाउडा-मण्डले ‘साल्किया’-विभागे तस्य द्वे उद्यानगृहे अभूताम्। खिदिर्पुरे च तस्यासीत् काचिद् भूमिः। नूतनभवनस्य निर्माणात् परम् अनुजान् सः आत्मना सह वासार्थं समाह्वयामास। ज्येष्ठभ्रातुः वचनं पुरस्कृत्य प्रथमः तृतीयश्च सोदरौ समायातौ। मध्यमस्तु पृथग् वासम् एव उचितं मेने। पश्चात्काले सर्वेषां सहोदराणाम् ऐकमत्येन पुरातनगृहं विक्रीतम्।

राममोहनस्य द्वौ तनयौ, सप्त कन्याः। दुर्गाप्रसादः कालीप्रसादश्च तत्पुत्रौ। दुर्गाप्रसाद-दत्तः प्रतिभामण्डितः युवा, संस्कृते पारसीभाषायां च व्युत्पन्नः। तस्य न्यायनैपुण्यं व्यवहारकौशलं च वीक्ष्य पिता राममोहनः स्वजीविकायां तं सहभागिनम् अकरोत्। तस्य यथाकालं विवाहसंस्कारः सम्पन्नः। उत्तरकोल्कत्तानगरे ‘दिवान्’ राजीवलोचन-घोषः निवसति स्म। तस्य कनिष्ठया कन्यया श्यामासुन्दर्या सह दुर्गाप्रसादस्य परिणयः निर्णीतः। श्यामासुन्दरी सुन्दरी विदुषी च। सा गङ्गाभक्ति-तरङ्गिणी-नाम काव्यं रचयामास। दुर्दैवात् सा कृतिः प्रकाशनात् पूर्वमेव विनष्टा। श्यामासुन्दर्याः अपत्यद्वयम्। प्रथमम् अपत्यं कन्या या सप्तमे वयसि विधिवशं गता। द्वितीयम् अपत्यं पुत्रः विश्वनाथदत्तः। विश्वनाथस्य जन्म १८३५-तमे वर्षे सम्भाव्यते।

दुर्गाप्रसादः यद्यपि यशस्वी गृहस्वामी तथापि संन्यासिजीवनं प्रति तस्य बलीयसी प्रवणता। गच्छता कालेन तस्य वैराग्यभावोऽपि वृद्धिं गतः। शिशोः विश्वनाथस्य षट्-सप्तेषु मासेषु व्यतीतेषु अन्नप्राशनसंस्कारः निर्वर्तितः। तत्पश्चात् अचिराद् एव दुर्गाप्रसादः सर्वसङ्गपरित्यागपूर्वकं संन्यासाश्रमं प्रविवेश। तदानीं तस्य वयः आसीत् विंशतिः द्वाविंशतिर्वा वर्षाणि। ततः द्वादशसंवत्सरान् यावत्

[२] काठा=७२० वर्गपादाः(square feet)। २० काठा=१ बिघा। ३ बिघा=१ एकर् भूमिः इति वङ्गदेशे भूपरिमाणं प्रथते।

गृहजनैः सह तस्य कोऽपि सम्पर्कः नासीत्। संन्यासिधर्मं पालयतः तस्य कालः तपसि एव व्यतीतः।

दुर्गाप्रसादस्य प्रव्रजनेन तत्पत्नीपुत्रयोः लोकयात्रा उपद्रवकण्टकिता संवृत्ता, दिनानि दुःखेन व्यतियन्ति स्म। तदा दुर्गाप्रसादस्य भ्राता कालीप्रसादः यद्यपि गृहनिर्वहणे अधिकृतः। भ्रातुष्पुत्रस्य[३] विश्वनाथस्य पालनादिकं तेन वोढव्यम् आपतितम्। किन्तु न तस्य तत्र अवधानम् आदरो वा। स्वार्थपरायणः सः दुर्गाप्रसादस्य परिवारम् उपेक्षितवान्। असहाया श्यामासुन्दरी धैर्यं न जहौ, धृत्या पुत्रस्य विश्वनाथस्य लालनपोषणादौ मनो बबन्ध। अभीरुः भक्तिमती च सा प्राप्तं कार्यभारं श्रद्धया निष्ठया निरवहत्। विश्वनाथः यदा त्रिवर्षः बालः तदा गृहजनैः तीर्थयात्रया वारणसी प्रयाता। तदानीं काले लोहपथ-यानादि आनुकूल्यं नैव आसीत्। अतः भागीरथीपथेन नौकया प्रतस्थुः। प्रायेण ५००-मैल्-मितं नदीयानम्। क्लेशैः स्निग्धभावैश्च सम्भिन्नं तत् प्रयाणं भीषणं रोमहर्षणं सत् मिश्ररसावहम् आसीत्। स्रोतस्विन्यां संसर्पतः यात्रिणः तत्र तत्र प्रत्युपतिष्ठन्ते स्म नवनवानुभवाः— नवीन-नगराणि, अपूर्वदृश्यानि, नूतनपरम्पराः, अश्रुतभाषाः, नवजनाः इत्येवमादयः तेषां चेतो ह्लादयन्ति स्म।

अत्रान्तरे अकस्माद् काचिद् आपद् आपतिता। कदाचित् प्रातः नौकातले खेलन् बालः विश्वनाथः गङ्गायां पपात। श्यामासुन्दरी सहसा अनुपपात। अविदिततरणा अपि सा अबला मातृत्वबलेन आत्मानं नद्यां प्राक्षिपत्। दिष्ट्या सा पुत्रं निमज्जनात् प्रागेव हस्तेन जवं जग्राह। तरणम् अजानन्ती सा नद्याः स्रोतसि प्लवमाना अलक्ष्यत। अचिन्तित-निजरक्षाणां पुत्ररक्षण-कातरां धृत-समस्त-वस्त्रबन्धां जले निपतितां तां दृष्ट्वा सहयात्रिणः तद्रक्षणाय समागमन्। तेषु भिषक् उमापदगुप्तः अपि अविद्यत। स खलु तस्मिन् काले दत्तपरिवारेण सह तद्गृहे एव निवसति स्म। अतः तैः सार्धं काशीयात्रायां भागं गृह्णन् सोऽपि

[३] "कस्कादिषु च"(अष्टाध्यायी ८.३.४८)इत्यतः विसर्गस्य षः।

उपस्थितः। मध्येमार्गम् उपनतां विपदम् उपलभ्य स झटिति गङ्गाम् अभि प्रापतत्। स्रोतसि श्यामसुन्दर्याः उत्प्लवमानं केशपाशं विलोक्य तद्-ग्रहणेन तां च शिशुं च आकृष्य जलाद् उन्नीय नौकां प्रापयामास। पोते तत्र सहयात्रिणां कालोचितेन उपचारेण माता पोतश्च सचेतनतां नीतौ। प्रियसुतं माता तथा दृढम् अगृह्णाद् यथा पुत्रहस्ते आटङ्कितं तच्चिह्नं बहून् अब्दान् यावत् नयनगोचरम् अगात्।

त्र्यम्बक-विश्वनाथकृपया त्रातम् अर्भक-विश्वनाथम् आदाय श्यामासुन्दरी तद्यात्रिणश्च अग्रे जग्मुः। तेषां शनैः नौका इतः वाराणसीम् अभि ससार, ततः सा महादेवपुरी तान् उपससार। यात्रिणां मनः विमलेन आनन्देन आप्लुतम्। पावनं तत् तीर्थं प्राप्य ते मन्दिरे श्रीविश्वनाथस्य दर्शनं पूजनं च यथाविधि व्यदधुः। ततः अन्नपूर्णामन्दिरादीनि द्रष्टव्यानि उपगम्य देवदेवीनां देर्शनादिना धन्यताम् अन्वविन्दन्। शामासुन्दरी वाराणस्या दिव्यपर्यावरणेन प्रहृष्टा सर्वान् देवालायान् अयासीत्। विरेश्वरशिवमन्दिरम् अपि अगमत्।

तत्र कस्मिंश्चिद् दिने दुर्गाप्रसादस्य अन्यतमा भगिनी, दत्तकुलस्य आत्मीया काचिद् अल्पवयाः विधवा च पद्भ्यां विश्वनाथदर्शनाय प्रतस्थाते। शीकरवर्षेण मार्गः पिच्छिलः आसीत्। कुलीनाः अवरोधावरुद्धाः नार्यः कर्दमयुते पाषाणादिपथे अनुपहितपद्भ्यां चरणे अनभ्यस्ताः प्रायेण। अतः अल्पवयाः सा विधवा पङ्किले पिच्छिले तले अकस्मात् पादस्खलनेन अधः पपात। ततो नातिदूरे पृष्ठतः आयात्सु यतिषु कश्चिद् इदं परिलक्ष्य सहसा उदीरयत् 'अये! सा माता न्यपतत्' इति। स गत्वा तां समुद्धृत्य उपवेशयामास। रभस-पातात् विगतसंज्ञा सा सम्प्रति प्राप्तसंज्ञा नेत्रे उन्मील्य पुरतः स्थितं काषायधारिणम् अपश्यत्। अहो किमाश्चर्यम्! तन्नयनयोः पुरस्ताद् आसीद् नान्यः पुमान्, प्रत्युत स्वपतिरेव! दुर्गाप्रसादः! सा च तरुणवयाः विधवा श्यामासुन्दरी। उभावपि अञ्जसा भावोद्रेकेण संपरिप्लुतौ। तथाऽपि तयोरुभयोः नासीत् संसारबन्धस्य

अवसरलेशोऽपि। स्वसा तु सोदरं दुर्गाप्रसादं पर्यचिनोत्। सत्यपि यतिवेषे, अनिरीक्षितेऽपि तदागमने भगिनी भ्रातरं कथङ्कारं विस्मरेत्? सा तत्कण्ठनादेन वदनाकृत्या च तं निजसोदरं विदित्वा अभाषत "कः? ओम्! दुर्गाप्रसादः?" इति। स यतिः तदा अनपेक्षितम् उपस्थितम् अवधार्य निर्वेदेन न्यगादीत् "अपि माम् उद्वेजयितुम् इहापि उपस्थिते?" इति। वदन्नेव इदं स त्वरितगत्या ततोऽन्यत्र जगाम। श्यामासुन्दरी च मनसः तं वृत्तान्तम् अपसार्य यथापूर्वं तीर्थभ्रमणम् अनुवर्तयाञ्चक्रे। एतस्मात् परं तद्-बान्धवेषु न कश्चित् कदाचित् दुर्गाप्रसादम् अद्राक्षीत्।

अपि दुर्गाप्रसादः जातु स्वगृहम् अगात्? संन्यासस्वीकारात् परं किं तेन स्वजन्मस्थानं प्रति कदाचिद् गतं न वा इत्यत्र दत्तकुले जनवादाः प्रथन्ते। तेषु कर्णाकर्णि प्रसृतः कश्चन वृत्तान्तः कौतुकम् आवहति, तस्य यतेः अन्तःसत्त्वं गुणसौष्ठवं प्रकाशयति च। कदाचित् दुर्गाप्रसादः गङ्गासागरदर्शनार्थी अकस्मात् कोल्कताम् आगतः। स्व-पूर्वाश्रम-गृहम् अगत्वा विना आडम्बरं सः प्राचीनबन्धोः कस्यचिद् गेहम् अध्युवास। अनुरुरोध च सखायं वार्तागोपने। किन्तु हर्षोद्रेकं दमयितुम् अशक्नुवन् स सखा तद्गृहजनान् सुखश्रुतिं श्रावयित्वा एव विरराम। प्राप्यैव इमां वार्तां तद्-भ्राता कालीप्रसादः तं गेहम् आनेतुं बद्धपरिकरः सञ्जातः। बान्धवाः तं दुर्गाप्रसादं बलात् शिविकायाम् उपवेश्य रक्षकभटैः सह तं स्वसदनम् आनयामासुः। तं पूजास्थानस्य समीपे 'बोधन'-गृहे निवेश्य बबन्धुः। अनेन निरुपायः तपस्वी यतिः तत्र प्रकोष्ठे विना वाग्व्यापारम् एकत्र कोणे उपविवेश। बान्धवाः तं प्रकोष्ठं बहिः कीलितवन्तः येन नासौ पुनः प्रयायात्। स दिनत्रयं यावत् ग्रासमात्रमपि अभुञ्जानः जपं कुर्वन् उवास। प्रायोपवेशेन तन्मरणम् आशङ्कमानाः बान्धवाः भयम् आगम्य उपयान्तरम् अपश्यन्तः द्वारम् उन्मोचयामासुः। ततः परं स संन्यासी यथागतं स्वपथं गच्छन् तिरोदधौ। अनन्तरकाले वारणस्यां सः कस्यचित् मठस्य अधीशः अभूत् इति दत्तपरिवारेण श्रुतम्। तां जनश्रुतिं

विहाय न किमपि वार्तान्तरं तद्विषं श्रुतिपथम् आजगाम। पश्चात् तदात्मजः विश्वनाथः प्राप्तवयाः जीविकासमर्थः सन् पित्रन्वेषणेन वाराणसीं गतः। किन्तु अन्वेषणेनापि तत्र स्वपिता तेन नाधिगतः।

दुर्गाप्रसादस्य परिव्रजनात् परं कालीप्रसादः एव दत्तपरिवारस्य गृहस्वामी। नासौ अल्पः परिवारः। विशाले संयुक्त-परिवारे तस्मिन् बहवः सम्बन्धिनः आश्रयं प्राप्नुवन्। यथा राममोहनस्य अन्यतमा पुत्री पुत्रपौत्रादिभिः तत्रैव न्यवसत्। ते चतुःपुरुषपर्यन्तं तत्परिवारस्य अङ्गभूताः बभूवुः। किन्तु कालीप्रसादस्य न कापि जीविका आसीत्। अतः सः कुटुम्बस्य निर्वहणाय संञ्चितं पैतृकं धनम् व्ययीचकार। ततः दत्तपरिवारः क्रमेण दारिद्र्यं गतः। यावद् दुर्गाप्रसादस्य सुपुत्रः विश्वनाथः तत्परिवारधुरं स्वस्कन्धयोः नावक्ष्यत् तावद् दत्तकुलाद् अभ्युदयसूर्यः तिरोहितः तस्थौ। उद्यमशीलं दक्षं धर्मपरायणं देवा अनुजिघृक्षन्ति न उदरम्भरिम्।

# स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम्

## [पूर्वाङ्कात् अनुवर्तते...]

### अनुवादकः– ब्रह्मचारी अच्युतचैतन्यः

वृन्दावनधाम्नि महाराजस्य इदं द्वितीयवारम् आगमनम् अभवत्। स्वधाम्नि उपस्थितः व्रजगोपबालः भगवद्भावेन तन्मयो भवति स्म। इत्थं कति दिनानि अतीतानि, कति महानिशाः संयाताः—नासीत् भगवद्ध्याने निमग्नस्य महाराजस्य तत्र अवधानम्। स कदाचित् सुबोधानन्दस्वामिना आनीतं भिक्षान्नं भुङ्क्ते स्म, कदाचित् अनादरेण तत् पतितमेव भवति स्म। कदाचित् मन्दिरगमनपूर्वकं भावविह्वलचित्तेन अनिमेषचक्षुषा श्रीविग्रहं पश्यन् भवति। कदाचिद्वा समाधौ निमग्नस्य तस्य बाह्यज्ञानं तिरोभवति स्म। किञ्च रात्रौ निद्रां विहाय ध्यानमेव अधिकं भवति स्म। समयेऽस्मिन् विजयकृष्णगोस्वामि-महोदयः श्रीवृन्दावने निवसति स्म। महाराजस्य कठिनतपस्यायाः वार्तां ज्ञात्वा एकद्युः स तत्सकाशम् उपस्थाय जिज्ञासितवान्— “परमहंसदेवः खलु भवन्तं सर्वप्रकाराणि साधनभजनाद्यनुभूतिदर्शनादीनि कारितवान्, तथापि किमर्थमिदानीम् एवं भृशं साधनाम् अनुतिष्ठति भवान्?” ब्रह्मानन्दः मृदुस्वरेण प्रत्युत्तरितवान्— “तस्य कृपया अनुभूतिः दर्शनं वा यत् सर्वमभूत्, इदानीं तत्सर्वम् आयत्तीकर्तुं चेष्टे केवलम्।” गोस्वामिमहोदयः उत्तरमिदं कथं स्वीकृतवान् तन्न ज्ञायते, परन्तु रामकृष्णसङ्घस्य इतिहासपर्यालोचकस्य दृष्ट्या एवंविधतपस्यायाः गूढतात्पर्यं वर्तते। सङ्घस्य अध्यात्मचेतना सदा क्रियाशीला स्यात् इत्यतः सङ्घस्य मर्मस्थले एकम् एतादृशं शक्तिकेन्द्रम् आवश्यकम् आसीत्, यस्मात् केन्द्रात्

कर्मणि व्यापृता अन्ये आधाराः प्रयोजनानुसारेण स्वं स्वं पौनःपुन्येन परिपूर्य श्रीरामकृष्णस्य भावधाराम् अव्याहतगत्या अग्रे नयेयुः। इतःपरम् कदाचिद् महाराजस्य ज्वरः अभूत्। तदा अचिरात् गोस्वामिमहोदयः तस्य दर्शनार्थम् आगत्य सुबोधानन्दात् ज्ञातवान् यत्, रोगाक्रान्तस्य मशकनिरोधनी नास्ति। श्रवणमात्रेण स मशकनिरोधन्याः औधषस्य च व्यवस्थां सम्पादितवान्। किञ्च भगवतः कृपया ब्रह्मानन्दः शीघ्रम् उल्लाघः सञ्जातः। तावता सुबोधानन्दस्य मनः पूर्वसङ्कल्पानुसारेण उत्तराखण्डगमननिमित्तम् अतीव व्यग्रम् अभवत्। महाराजस्य समीपे यदा इदं ज्ञापितवान् तदा महाराजः सानन्दं तस्य यात्रार्थम् अनुमतिं प्रदत्तवान्। परन्तु सः स्वयं वृन्दावने अतिष्ठत्।

वृन्दावने अवस्थानकाले स एकस्मिन् दिवसे अपश्यत् यत्, भक्तप्रवरः श्रीबलराममहोदयः ज्योतिर्मयदेहसमन्वितः हसन् दिव्यलोकम् आरोहत्। परं यथासमयं पत्रेण ज्ञातवान् यत्, स देहत्यागं कृतवान् (नवत्युत्तराष्टदशशततम-क्रैस्तवर्षस्य एप्रिल्-मासस्य त्रयोदशदिनाङ्के)। इतःपरम् इतोऽपि मासाधिकं कालं वृन्दावने स्थित्वा सेप्टेम्बर्-मासस्य अन्तिमे स पद्भ्याम् एव हरिद्वारे उपनीतः अभूत्। अपरे केचन गुरुभ्रातारः तस्मिन् स्थाने पूर्वतः एव तपोनिरताः अविद्यन्त। एकनवत्युत्तराष्टदशशततम-क्रैस्तवर्षस्य जानुयारि-मासे एकस्मिन् दिने स्वामी विवेकानन्दः तैः सहः ब्रह्मानन्दसकाशं समागत्य तैः सह गमनार्थं तम् आदिष्टवान्। महाराजः तस्य आदेशानुसारं मेरठनगरं गतवान्, तत्र अखण्डानन्देन सह मिलितवान् च। मेरठनगरे मार्चमासं यापयित्वा स्वामिविवेकानन्दः सर्वान् सूचयित्वा निःसङ्गः भ्रमणार्थं निर्गतवान्। ततः ब्रह्मानन्दस्वामी अपि तुरीयानन्दस्वामिना सह एप्रिल्-मासि ज्वालामुखीतीर्थं प्रति निरयात्। ज्वालामुखीनगरात् तौ काङ्गडा, पाठानकोटः, गुजरानवाला, लाहोरः, मन्टगोमारी, मूलतानं, सक्करः इत्यादिनगराणि भ्रमित्वा कराचीनगरम् आगतवन्तौ। कराचीनगरात् पोतेन बम्बै-नगरम् आगत्य पुनः स्वामिना

विवेकानन्देन तयोः मेलनं जातम्। विवेकानन्दस्वामी तदा आमेरिकां गन्तुम् उद्युक्तः, किन्तु तत्पूर्वं खेतड़ीराजस्य आह्वानानुसारेण तेन सह साक्षात्कर्तुं प्रवृत्तः। ब्रह्मानन्दः तुरीयानन्दश्चापि तेन सह गच्छन्तौ आबुरोड इत्याख्ये रेलस्थानके अवतीर्य अर्बुदपर्वते उपस्थितौ अभवताम्। स्वामिविवेकानन्दमहाराजस्य खेतड़ीनगरात् बम्बै-नगरस्य प्रत्यागमनकाले तौ पुनः आबुरोड-नामके स्थाने तेन सह स्वल्पक्षणं साक्षात्कृतवान्तौ। अतःपरं कानिचन दिनानि अर्बुदपर्वते स्थित्वा आवुरोड-नगरं प्रत्यावर्तेताम्, किञ्च स्वामिनः ब्रह्मानन्दस्य आह्वानेन बम्बै-नगरात् अखण्डानन्देऽपि तत्रागते त्रयः मिलित्वा आजमीरनगरं भ्रमित्वा जयपुरं गतवन्तः। ततः एकमासानन्तरम् अखण्डानन्दः राजपूताना-नगरम् उद्दिश्य निर्गतः। किञ्च महाराजः तुरीयानन्दस्वामी च वृन्दावनं गतवन्तौ।

वृन्दावनमागत्य उभौ सतीर्थौ दिव्यभावे निमग्नौ आस्ताम्। तुरीयानन्दः एकस्मिन् दिने अवदत् यत्, अद्य भिक्षार्थं न गच्छानि, पश्यामि राधाराणी भोजनं ददाति उत न। ध्याने निमग्नस्य गुरुभ्रातृद्वयस्य दिवारात्रम् एकं कथम् अतिक्रान्तम् इति न ज्ञातम्। परस्मिन् दिवसे कश्चन तीर्थयात्री स्वयं प्रचुरं खाद्यद्रव्यं दत्वा गतवान्। वृन्दावनात् तौ पद्भ्यां नन्दग्रामः, वर्षाणा, राधाकुण्डम्, श्यामकुण्डम्,गोवर्धनगिरिः इत्यादि दृष्ट्वा कुसुमसरोवरस्य निकटम् उपनीतौ। स्थानमिदं तपस्यानुकूलमिति दृष्ट्वा तत्रैव अतिष्ठताम्। अस्मिन् समये परिपालितस्य कठोरजीवनयापनस्य इतिहासं वयं किमपि न जानीमः इत्येव वक्तव्यम्। अन्यस्य समयस्य वा विषये वयं कियत् जानीमः, भावमयस्य ठाकुरस्य मानसपुत्रस्य नानातीर्थेषु यद्यत् साधनानुभूतिदर्शनादि अभवत् तस्य कियत् वयम् अस्मिन् क्षुद्रे प्रबन्धे लेखितुं शक्नुमः। इतोऽपि कियद् वा भाषया प्रकाशयितुं शक्यते। महाराजः प्रायः वदति स्म, निर्विकल्पसमाधेरनन्तरं धर्मजीवनम् आरभ्यते इति। यः निर्विकल्पकसमाधिः बहूनां जन्मनां साधनेन क्वचित् कस्यचिद्वा अदृष्टे लभ्यते, तस्मिन् प्रतिष्ठितः सन् किञ्च ततः ऊर्ध्वम्

अनुभूतिसम्पदा भूषितः यः बहून् भक्तान् धर्ममार्गे परिचालितवान्, तस्य अध्यात्मजीवनस्य अतिस्थूलाभासमात्रं वयं परिचाययितुं सक्षमाः।

# स्वामिसारदानन्दकृतः श्रीश्रीरामकृष्णलीलाप्रसङ्गः

[पूर्वाङ्कात् अनुवर्तते...]

अनुवादकौ– डॉ. राकेशदाशः*, शान्तनुनायेकः†

## प्रथमः खण्डः— तृतीयोऽध्यायः (कामारपुकुरे धर्मसंसारः)

### क्षुदिरामस्य भगिन्याः श्रीमत्याः रामशीलायाः कथा

पूर्वमेव वयम् उल्लिखितवन्तः यत् श्रीयुक्तक्षुदिरामस्य रामशीलाख्या एका भगिनी, निधिरामः कानाइरामः अथवा रामकानाइः इत्याख्यौ द्वौ भ्रातरौ आस्ताम्। देरेपुरस्य भूस्वामिना सह कलहवशात् यदा सः निःस्वः अभूत् तदा तस्य भगिन्याः वयः प्रायः पञ्चत्रिंशत् वर्षाणि, भ्रातृद्वयस्य च त्रिंशत् पञ्चविंशतिः वर्षाणि च इति भवेत्। तदा ते सर्वेऽपि विवाहं कृत्वा संसारं प्राविशन्। कामारपुकुरतः प्रायः षट्-क्रोश-पश्चिमे स्थिते छिलिमपुरे स्वर्गीयेण भागवत-वन्द्योपाध्यायेन सह श्रीमत्याः रामशीलायाः विवाहः अभूत्, ततश्च रामचन्द्रनामधेयः एकः पुत्रः हेमाङ्गिनीनाम्नी एका कन्या च जज्ञाते। तस्मिन् विपत्काले रामचन्द्रस्य वयः प्रायः एकविंशतिः वर्षाणि, हेमाङ्गिन्याः च षोडश वर्षाणि आसीत्। तदा श्रीयुक्तरामचन्द्रः मेदिनीपुरे व्यवहारवृत्तिम् आरब्धवान्। श्रीमतीहेमाङ्गिन्याः जन्म देरेपुरस्थे मातुलालये एव अभूत्, अपि च भ्रातृभ्योऽपि

* सहायकाध्यापकः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोध-संस्थानस्य, बेलुडमठस्य।

† शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

सा मातुलानां स्नेहम् अधिकम् अलभत। श्रीयुक्तक्षुदिरामः तां दुहितृवत् पालयित्वा विवाहकाले च उपस्थिते सति कामारपुकुरतः वायव्यां दिशि प्रायः सार्धद्विक्रोशे स्थिते शिहडाख्यग्रामस्य श्रीयुक्तकृष्णचन्द्रमुखोपाध्यायाय तां स्वयं सम्प्रादात्। यौवनकाले च सम्प्राप्ते सा क्रमशः राघवः, रामरत्नः, हृदयरामः, राजारामः इति नामकानां चतुर्णां पुत्राणां जननी अभूत्।

## क्षुदिरामस्य भ्रातृद्वयस्य कथा

श्रीयुक्तक्षुदिरामस्य निधिरामाख्यस्य भ्रातुः काचन सन्ततिः आसीद् न वेति अस्माभिः न ज्ञायते; किन्तु कनिष्ठतमस्य कानाइरामस्य रामतारकः अथवा हलधारी, कालिदासश्च इति द्वौ पुत्रौ अजनिषाताम्। कानाइरामः भक्तिमान् भावुकश्च आसीत्। एकदा सः कुत्रापि नाट्यं श्रोतुं गतवान् आसीत्। तदा तत्र श्रीरामचन्द्रस्य वनगमनाभिनयः प्रवर्तते स्म। तत् शृण्वन् सः तथा तन्मयः अभवत् यत् कैकेय्याः श्रीरामचन्द्रं वनं प्रेषयितुम् मन्त्रणचेष्टादिकम् अवगम्य कैकेयीरूपाम् अभिनेत्रीं प्रहर्तुम् उद्यतोऽभूत्। यद्वा भवतु, पैतृकसम्पत्तेः लोपाद् अनन्तरं निधिरामः कानाइरामश्च देरेपुरं परित्यज्य प्रायः येषु ग्रामेषु तेषां श्वशुरालयाः आसन्, तेषु ग्रामेषु आश्रयं स्वीकृतवन्तः।

## क्षुदिरामस्य भागिनेयः रामचाँदः

श्रीमत्याः रामशीलायाः पुत्रस्य श्रीयुक्तरामचाँदवन्द्योपाध्यायस्य मेदिनीपुरे व्यवहारवृत्तेः कथां वयं पूर्वमेव उल्लिखितवन्तः। व्यवसायवशात् सः मेदिनीपुरे निवसन् किञ्चिद् धनम् अर्जयति स्म। तदा मातुलानां दुरवस्थां स्मृत्वा एषः श्रीयुक्तक्षुदिरामाय प्रतिमासं पञ्चदश रूप्यकाणि, निधिरामाय कानाइरामाय च प्रत्येकं प्रतिमासं दश रूप्यकाणि प्रदाय तयोः साहाय्यं कुर्वन् आसीत्। श्रीयुक्तक्षुदिरामः किञ्चित्कालं यावत् भागिनेयस्य वार्तां न प्राप्नोति चेदेव चिन्तितो भूत्वा मेदिनीपुरं गच्छति स्म, द्वे वा चत्वारि वा दिनानि तस्य गृहे निवासं कृत्वा कामारपुकुरं प्रत्यागच्छति स्म। एकस्मिन्नवसरे तथा मेदिनीपुरागमनकाले

तस्य विषये विशिष्टामेकां घटनां वयं श्रुतवन्तः। सा घटना श्रीयुक्तक्षुदिरामस्य आन्तरिकदेवभक्तेः परिचायिका इति हेतोः वयम् अत्र तस्य उल्लेखं कृतवन्तः।

## क्षुदिरामस्य देवभक्तेः परिचायिका घटना

कामारपुकुरतः नैर्ऋत्यां दिशि प्रायः चत्वारिंशत्-माइल-दूरे मेदिनीपुरम्। रामचाँदस्य तदात्मीयानां च कुशलवार्तां बहूनि दिनानि यावद् अप्राप्य चिन्तामग्नः श्रीयुक्तक्षुदिरामः एकदा तत्स्थानं गन्तुं गृहात् निष्क्रान्तः। तदा माघमासः फाल्गुनमासो वा भवेत्। बिल्ववृक्षाणां सर्वाणि पत्राणि एतस्मिन् काले पतन्ति, अपि च यावद् नूतनपत्रोद्भवो न भवति, तावद् जनानां शिवपूजायां बहु कष्टं भवति। श्रीयुक्तक्षुदिरामः तत्कष्टं केभ्यश्चिद् दिवसेभ्यः पूर्वतः एव विशेषरूपेण अनुभूतवान् आसीत्।

सः प्रत्यूषे निर्गत्य प्रायः दशवादनपर्यन्तम् अनवरतं मार्गे चलित्वा कञ्चन ग्रामं प्राप्तवान्, तत्र च नवीनपत्राभरणेन भूषितानां सर्वेषां बिल्ववृक्षाणां दर्शनेन तस्य मनः उल्लसितम् अभूत्। तदा मेदिनीपुरगमनस्य विषयम् पूर्णतया विस्मृत्य सः ग्रामतः एकां नूतनां कण्डोलिकाम्, एकां गात्रमार्जनीं च क्रीत्वा समीपस्थायाः पुष्करिण्याः जले सम्यक् प्रक्षालितवान्। अनन्तरं नवीनबिल्वपत्रैः कण्डोलिकां पूरयित्वा, आर्द्रया गात्रमार्जन्या तानि पत्राणि आच्छाद्य, अपराह्ने प्रायः त्रिवादने कामारपुकुरम् आजगाम। गृहं प्राप्यैव श्रीयुक्तक्षुदिरामः स्नानं सम्पाद्य सानन्दं तैः सर्वैः बिल्वपत्रैः महादेवं शीतलामातरं च बहुकालपर्यन्तम् अपूपुजत्; अनन्तरं स्वयम् आहारार्थम् उपविष्टवान्। तदा श्रीमतीचन्द्रादेवी अवकाशं प्राप्य तं मेदिनीपुरं प्रति अगमनस्य कारणं पृष्टवती, आद्योपान्तं सर्वं श्रुत्वा च बिल्वपत्रैः देवाराधनस्य लोभेन एतावन्तं मार्गं अतिक्रमितवान् इति ज्ञात्वा सा नितरां विस्मिता अभूत्। परेद्यवि प्रातःकाले श्रीयुक्तक्षुदिरामः पुनः मेदिनीपुरं प्रति निर्गतः।

